प्रवेश सं० 

विषयः धर्मशास्त्रम्

क्रम सं० 

नाम दीपेन्दुशेखरः

ग्रन्थकार नागोजीभट्टः

पत्र सं० १-३०

श्लोक सं० 

अक्षर सं० (पंक्तौ) ४०

पंक्ति सं० (पृष्ठे)

आकारः १२.५ x ४.८

लिपिः देवनागरी

आधारः 

सं. १८५१

वि० विवरणम् पू.

सी० एस० यू० पी०--७७ एस० सी० ई०--१९५१--५० ०००

12211

अ. जी. ४६

Indira Gandhi National
Centre for the Arts

२/२

८८ तीर्थेंदुशेखरः ३०

Indira Gandhi National
Centre for the Arts

१ श्रीगणेशायनमः॥ अथतीर्थयात्राधिकार्यादिनिर्णयः कर्मणामनसावाचायत्नाद्धर्मंसमाचरेदित्यादिस्मृतिभिर्धर्मस्यावश्यकर्तव्य
तोक्ता तत्रयज्ञादिधर्मस्यबहुधनादिसाध्यत्वेनतत्राक्षमस्यात्रितीर्थयात्राविहितामात्स्येभारतेच योदरिद्रैरपिविधिःशक्यःप्रा
प्तुंनरेश्वरः तुल्योयज्ञफलैःपुण्यैस्तंनिबोधमहीपते ऋषीणांपरमंगुह्यमिदंभरतसत्तम तीर्थाभिगमनंपुण्यंयज्ञैरपिविशिष्य
तेऽनुपोष्यत्रिरात्राणितीर्थान्यनभिगम्यच अदत्वाकांचनंगाश्चदरिद्रोनामजायते अग्निष्टोमादिभिर्यज्ञैरिष्ट्वाविपुल
दक्षिणैः नतत्फलमवाप्नोतितीर्थाभिगमनेनयत् इति तत्रब्रह्मचारिणोगुर्वनुज्ञयैवाधिकारः गृहस्थस्यापियागाद्यनुष्ठा
नासमर्थस्यतत्रानधिकारिणोवा सापेक्षस्यसपत्नीकस्यैवप्रायश्चित्तार्थंतद्रहितस्यापि यतेरप्यधिकारः नगरेतीर्थेचपं
चरात्रंवसेत् इतिकात्यायनोक्तेः ब्रह्मसंस्थस्यतुनस्यक्रियादेरपि ब्राह्मणःक्षत्रियोवैश्यःशूद्रोवाराजसत्तम नवियोनिंव्रजं
तेतेस्नातास्तीर्थेषुसततमितिभारतात् तत्रशूद्रस्यद्विजसेवा विरोधेसैव नद्विरोधेतुजपस्तपस्तीर्थयात्राप्रव्रज्यामंत्रसाध
नंदेवताराधनंचेतिस्त्रीशूद्रपतनानिषडितिमनुः अतस्सधवस्त्रियाःसधवायाभर्त्रासहैवाधिकारः विधवानामपिपुत्रा राम
१

द्यनुमत्या अनुलोमसंकराणामपि तेषांद्विजधर्माधिकारात् प्रतिलोमसंकराणामपिशूद्रसधर्मत्वात्तेषां वापिज्ञराजसेवादि
प्रसंगेनतीर्थगमनेस्नानादिजमेवफलंनयात्राजन्यं उद्देश्यतीर्थांतरप्रसंगेनगमनेत्वर्धयात्राफलं वेतनग्रहणेनपरार्थंव्रजतो
विषोडशांशयात्राफलं परान्नभुजोप्येवं अन्नदानादिनाम्नस्तीर्थकारणेचतुर्गुणं विशिष्टस्ततप्रातःकारणेत्वष्टगुणं
मात्स्ये गोयानेगोवधःप्रोक्तोहयपानेतुनिष्फलं नरयानेतदर्धंस्यात्पद्भ्यांतत्स्याच्चतुर्गुणं चतुर्गुणंचतुरंशंपूर्णमित
थेः नचस्नातकस्यसोपानभ्यामेवपद्भ्यांगमनं सोपानत्कःसदाव्रजेदितिस्नातकप्रकरणेउक्तेः द्विजानांतुतीर्थेषुशंहरे
त्सर्वेप्रतिग्रहः यानमर्धंचतुर्थांशश्चत्रोपानहमेवचेतिजाबालिस्मृत्युक्तंतु अस्नातकविषयं पानमर्धमितिसंमतंतुसर्वविषयं
अस्मेतु अस्यवचनस्यसर्वविषयतांमत्वानिरुपानभ्यामेवपद्भ्यांपूर्णमित्याहुः कल्पतरौतु गोयानेइत्यादिमात्स्यमपा
गप्रकरणात् द्विषयमेव जाबाल्यादिचस्मृत्वनाश्वासइत्युक्तं अशक्तस्यतुयानेनगमनेपिपूर्णफलं यानमेर्धमितिमुक्ते
नौकायानमपिशक्तस्यदोषाय पत्रतुलाद्याविनागमनासंभवस्तत्रनौर्नदोषाय पानित्वनेकदिननौकायानमात्र

Indira Gandhi National
Centre for the Arts

साध्यानिसमुद्रद्वीपादिनिषिद्धानितत्रद्विजेनेगंतव्यं·द्विस्तोजेत्वौतुलोभात्ः शोभितस्तापिसंग्रहइतिकलिनिषिद्धेषूक्तेः
२ प्रहरादिमात्रगम्येतुनपातकप्रसक्तिः अंगादिदेशेषपितीर्थयात्रार्थंगमनेनदोषः वायवीयेअधिमासेवजन्मसंत्र
लेचगुरुशुक्रयोः तीर्थयात्रानकर्त्तव्यागयांगोदावरींविनेतिअत्रचेनज्ञोति शास्त्राद्युक्तसकलदोषसंग्रहः तीर्थे
स्थित्वातीर्थांतरंनस्मरेन्नचब्रूयात्गंगांतुसर्वेचस्मरेत्तथातीर्थमधिगम्यव्रतोपवासनियमयुक्तस्त्वेहमवगाहमा
नल्लिगात्रमुषित्वासर्वपापेभ्योमुच्यतेइतिदेवलः मार्गेनरानदीप्राप्तोस्नानादिपरपारत ःअर्वागेवंसरस्वत्यामेषमा
गगतोविधिःस्नानतर्पणाघकृत्वानदींनातिक्रामेत्नतत्त्वंतीमतिक्रामेदनवसिष्ठेतिशंखवात्इदंचार्वाक्तीरेतीर्थवि
शेषाभावेसरस्वत्यांपरपारेतीर्थविशेषसत्वेतीरद्वयेपिस्नानादीतिवोध्यंतीरद्वयेपितीर्थविशेषसत्वेनपूर्वतरेप्येवमेव
तीर्थजिगमिषुः पूर्वदिनेएकभक्तहविष्यभोजनब्रह्मचर्यादिनियमग्रहणपूर्वकमुपोष्यपरदिनेगणेशदेवतेसं राम
पूज्यघृतमुखप्रमकंतीर्थश्राद्धीयेदेवतानांपार्वणविधिनाश्राद्धंविधाययथाशक्तिवस्त्रादिभिर्ब्राह्मणान्संपू २

ज्यपात्रासंकल्पंविधायमुहूर्त्तेसमयेग्रामान्निर्गम्यतंप्रदक्षिणीकृत्यक्रोशाभ्यंतरस्थग्रामांतरंगत्वाश्राद्धशेषघृ
तेनपारणांकृत्वादिनांतरेस्नानादिविधायनियमवानाछेत् उपवासदिनेएवापरणआदौमुहूर्त्तेफलवस्त्रादिम
स्यानंकार्यं० उपवासासामर्थ्येतुएकादशीप्रकरणोक्तनक्ताद्यन्यतमंगयायात्रायांमार्गेगमनकालेकार्पटीवेषक
रणं·कार्पटीवेषश्चशस्त्रोष्णीषादित्यागः नत्वेतद्दलान्मुंडनसिद्धिरितिवोध्यं· आपश्चिमार्थेतीर्थयात्रायामुपवा
सदिनेमुंडनमपिकार्यं·केचित्तीर्थयात्रासामान्येमुंडनमिच्छंति·गयायात्रायांतुवायुपुराणेकार्पटीवेषोक्तेर्मुंडनमा
वश्यकमितरन्ये· परान्नपरगृहवासावपिसमीपग्रामांतरेष्टदृष्टकार्यंअत्रोपवासमपिकेचिदिच्छंतिअत्रमत्रापि
तीर्थेतत्रैवसदिनेकार्पटीविषःकार्यः सर्वोष्णीषशस्त्रादित्यागरूपः तीर्थयात्रायांकामक्रोधलोभावर्ज्याः
शीतातपादिद्वंद्वानिचसोढव्यानिअत्रन्नेनोब्रह्मचर्यंचकार्यंच· प्रतिग्रहंविनाजीवननिर्वाहेततोनिवृत्तिश्चकार्या· यस्य
हस्तौचपादौचमनश्चैवसुसंयतं· विद्यातपश्चकीर्त्तिश्चसतीर्थफलमश्नुते· हस्तसंयमः परस्वाग्रहणं· पादस

Indira Gandhi National
Centre for the Arts

यमो ऽगम्यदेशगमननिरतिः मनःसंयमः परानिष्टापचिंतनं विद्या तीर्थमहिमज्ञानं तपः उपवासादिः कीर्तिः सच्चरित्र
३ त्वप्रसिद्धिः एवमहं भावस्यागोपितुः प्रतिग्रहार्जितधनेन च यात्रा न कार्या दुष्टभावस्य भक्तिहीनस्य न तीर्थफलं
शमदमाद्युपेत्यत्रागं रात्रौ कृतसंध्याह्निकेन प्रातःस्नात्वा कृतनित्यक्रियेण मार्गेण चलितव्यं शक्तः स्नात्वैव गच्छे
त् तीर्थविवाहे यात्रायां संग्रामे देशविप्लवे नगरग्रामदाहे च स्पृष्टास्पृष्टिर्न दुष्यति तासां दस्पर्शस्य स्पर्शे ज्ञा
ते तु दोष एवमध्ये सूतकादि प्राप्तौ आशौचकालं तत्रैव समाप्य गच्छेत् मार्गवैषम्यादिना स्थातुमशक्तो नु यात्रायां
नाशौचं मध्ये तत एव निहतोसकलबाधनिमित्तकं प्रायश्चित्तं कार्यं मध्येमृतस्य समर्षिलोकमाप्तिः मध्ये तीर्थान्तर
प्राप्तौ न चापि स्नानादिकार्यं कर्मनाशाजलस्पर्शात्करतोयाविलंघनात् गंडकीबाहुतरणात्पुनः संस्कारमर्हति करतो
याजलस्पर्शस्तु न निषिद्धः । करतोयां कुरंगं च त्रिरात्रोपोषितो नरः अश्वमेधमवाप्नोति विगाह्य प्रयतः शुचिरिति मुक्ते
: करतोयायां केवलमुल्लंघनं न निषिद्धं किं तु साक्षेवेन मन्ये । तीर्थप्राप्तौ यानारूढो यानं परित्यज्य पादचारेण गत्वा ती राम
३

र्थे हृष्टिपथं गते सांगं प्रणम्य शिरोवेष्टनशस्त्रादीन्परित्यज्य विनीतवेषेण तीर्थं प्रविश्य प्रणवेन तीर्थं स्पृष्ट्वा सचे
लस्नात्वा वपनं कृत्वा पुनर्मंत्रवत्स्नानं कृत्वा तद्दिने उपवासं कुर्यात् तत्पूर्वदिने उपवास इति कश्चित् उपवासः काम्य
व पापक्षयफलकोनत्वावश्यक इति कल्पतरुः अग्रिमकार्येषु शुद्धिजनक इत्यन्ये मुंडनोपवासौ च देवलेनोक्तौ मुंडनं
चोपवासश्च सर्वतीर्थेष्वयं विधिः वर्जयित्वा कुरुक्षेत्रं विशालां विरजां गयामिति विरजमुत्कलदेशे दक्षिणदेशस्य
लोणारक्षेत्रमपि विरजं कश्चित्तु नैमिषं पुष्करं गयामिति पाठः विशालं पुष्करं गयामिति अन्यत्र वर्जयित्वा गयां गंगामि
त्यन्यत्र पाठः गंगां प्राप्य सरित्श्रेष्ठां वपनं येन कारयेत् स कोटिकुलसंयुक्त आकल्पं रौरवं व्रजेदित्यादि तु पुद्गलमा
लिकं तदा प्रयागमायापुरी काश्यादि तीर्थसमीपस्थगंगापरमित्याहुः यत्त्वत्र मतवै तीर्थशब्दो बहुव्रीहिणा रू
ढ्या च प्रयागमात्रपरो ऽनस्तत्रैवोपवासवपने इति तन्न बहुवचनानुपपत्तेः एवं प्रयागादिषु नव बहुव्रीहिस्वयं
इति न ज्ञात्वा स्वादाय बहुवचनोपपत्तिः किंचैतत्समानाकारं वचनमस्ति वायुपुराणे यो गयां प्रकरणस्तादेव प्रभास

Indira Gandhi National
Centre for the Arts

प्रकरणेपठितेऽतोनप्रयागमात्रपरता·मास्येऽन्येचवहवस्तीर्थाः सर्वपापहराः शुभाः तस्मात्कुरुक्षेत्रेसर्वतीर्थाभिषेचनमितिप्रया
४ गप्रकरणेपाठस्तत्ररुद्रेरसंभवाच्चप्रयागेसर्वतीर्थेभ्यः प्रवदंत्यधिकंविभोगइतिभारतविरोधाच्च· अपिचविशालादिपर्युदासानु
पपत्तिश्चप्रयागपरत्वेमास्यभावेनपर्युदासानौचित्यात् दोषाधिक्यपरतानुवाक्यार्थानुपपत्तेरसंभवदुक्तिका· सामान्यनिषेध
नैवसिद्धेविशेषनिषेधस्यहिनद्याधिक्यपरताहष्टागंगायांभास्करक्षेत्रेइतिवाक्येगंगापदंचतीर्थमात्रोपलक्षणंविनातीर्थवि
नायकमित्यादिवक्ष्यमाणवाक्यात् एतेनानेननियमेनान्यत्रप्राप्त्यभावइत्यपित्वागयायामित्यादिव्यर्थमित्यपास्तंतत्रवाक्येकु
रुक्षेत्रपदेनकाश्यपिवक्ष्यमाणश्रुत्याहिस्वरसादिसत्त्वेपदपिगंगायांभास्करक्षेत्रेमातापित्रोर्मृतेगुरौ: आधानेसोमपाने
चवपनंसप्तसुस्मृतमितिवाक्येभास्करक्षेत्रपदेनप्रयागमुक्त्वातदवच्छिन्नगंगायांमुंडनमितिआचसतेनतदपिन· प्रयागस्यप्र
जापतिक्षेत्रत्वात् प्रजापतेरिदंक्षेत्रंप्रयागमितिविश्रुतमितिमात्स्यात् एतत्प्रजापतिक्षेत्रंत्रिषुलोकेषुविश्रुतमितिप्रयागमुपक्र
म्यकौर्मोक्तेश्च·तत्रयःसवितुःक्षेत्रेप्राणांस्त्यजतिमानवः सस्तूयतेलोकमाप्नोतीत्यादिनातदंतर्गतकोणादित्यादेरेवभास्करक्षेत्र राम ५

त्वप्रतीतेश्चतत्र·प्रयागेसमस्तिन्युपवाससंस्माविरोधाद्धिमोचमुंडनोपवासौकाम्यौ·तीर्थेषुवपनंधर्म्यमुपवासश्चस्वर्गदः दानमस्य
मुद्दिष्टंजन्ममृत्युजरापहमितिब्राह्मात्· अतएवबहुषुतीर्थेषुमदनाचारोपिशिष्टानांदुष्टंशोणितंदृष्ट्वातुपिंडंदद्यादमेध्यवत्
नौपतितमितितत्स्वर्वपोविनामुंडितंशिरइत्यादियदिप्रामाणिकंतदातत्रापवादपरंवोध्यं·संवत्सरंद्विमासेनुपुनस्तीर्थंव्रजेद्यदिमुंडनं
चोपवासंचततोयत्नेनकारयेदित्यभियुक्ताः यत्नेनेत्यस्यसमांतत्फलकामनायामित्यादिफलंचमुंडनमंत्रेस्पष्टमेव·तत्रवपनं
कारयिष्येइतिसंकल्पःवपाम्यहमितिमंत्रेऽतर्भावितण्यर्थोवपतिरितिवहवः वपनंकरिष्यइतिसंकल्पेपिताहशराःवेत्यन्ये·तत्रा
दौश्मश्रुकूर्चयोर्वपनंततःकेशानामित्युचितंतत्रतीर्थेदक्षिणभागमारभ्यमुंडपित्रादिमृतेनानुवामभागमारभ्यउदङ्मुखः प्राङ्मु
खोवावापयेत्· प्रायश्चित्तार्थेतुसशिखंवपनंयतिःशूद्रश्चविधवासशिखंवपनंचरेत्·तत्रपतयःऋतुसंधिभिन्नकालेतीर्थप्राप्ताव
पिनवपंतीतितदाचारः आहितानग्न्यस्तुपर्वभिन्नेपिकालेतीर्थप्राप्तोकुर्वंति·पित्रादिमरणेनिमित्तेयथातद्वत्·सधवानांतुप्रयागा
दितीर्थेषुअंगुलछेदरावमुंडनंसर्वान्केशान्समुद्धृत्यछेदयेदंगुलद्वयं·एवमेवतुनारीणांमुंडमुंडनमादिशेदितिप्रायश्चित्तमकर

Indira Gandhi National
Centre for the Arts

५ णपटितस्मृत्युत्तराधेनयत्रयत्रैवेधंमुंडनंप्राप्नोतितत्रसधवानामेवमेवेत्यर्थःकेनाप्यत्रापितथैवेतिवोधनातृसर्वाङ्केशानिमाधु
त्कातीर्थादिषुसमभर्तृणांस्यादेवंकेशवापनमितिदिवोदासीयेउक्तेश्च·केशमूलान्युपाश्रिमसर्वपापानिदेहिनामित्यनेनतृत
विरोधःवचनातावच्छेदेनैवमूलगपापनाशक[illegible]हुला।च्छेरः इष्टभोगेमूलेसत्वअंगुलमितेदेशेमुंडनंतासांतत्र
स्मरेण्णैवआधानमकरणोऽत्रापत्तेवादपोपिराव्वपन्नीकेशवर्जमितिपठंति·रामयुधिष्ठिरभरतनत्सम्पादा।नांमुंडनाश्रवणात्स
त्रीयाणांतदनधिकारंवदंति·केचित्तुराजाकुमारीनारीचजीवत्पत्न्यपितृःसुतःमुंडनंसर्वतीर्थेषुनकुर्यादुर्मिर्यापतिरितिपठंति
तन्मिमूलंविनातीर्थेविनायज्ञंमातापित्रोर्मृतिविनायोवापयतिलोमानिसपुत्रःपितृघातकदत्युक्तेरित्येमे·एवंचसधवानांप
यागेसर्वमुंडनेऽन्यत्रतीर्थेअंगुलछेदस्याप्यकरणेऽम्यमस्राचारोवामूलं·स्पोरंनैमितिकंकार्येलिषेधेसत्यपिध्रुवं·पित्रादिम्
तिदीक्षासुमायश्चित्तेचतीर्थकेष्वतिस्मृतेर्ज्ञोःशास्त्रादिनिषिद्धकालेपिमुंडनंगंगातीरेमुंडनंतयाकार्यंयथावायुनाके
शाद्तीर्थेपतंतिविष्णुपादांगुष्टविनिर्गतजलसहितत्स्याहात्म्यपत्नकेवलममिसंधिपूर्वकंत्स्नानाद्युपभोगेपूपकारकंकि राम ५

त्वनमिसंहितमपित्र्यपेतप्रापास्याप्यस्थिचर्मस्नाय्वकेशाद्युक्तदृष्टशारीरजमलः शारीरिपांसवैगेनयतीतिवि[illegible]ष्णुपुराणात्स्वयम
विमृतास्थ्यादिवर्ज्जगाजलेप्रक्षेपमंत्रं·तुषकेशपुरीषपस्मास्थिश्लेष्मनरवलोमान्यप्सुनक्षिपेदितिशंखोक्तनिषेधस्तज
लांतरपरइत्यनेन·प्रत्याहक्तोदकेरज्ञोयोगचस्नानंगंगातिरिक्तनद्यादुष्टांत्राकस्मिकतीर्थप्राप्तोतत्ररात्रावपिस्नानंबुद्धिपूर्वंतु
रात्रौतीर्थेनमवेष्टव्यंगंगायांत्विदंनिर्विवादंभुक्त्वावायदिवाभुक्त्वादिवावायदिवानिशिनकालनियमःकश्चिद्गंगांप्राप्यसरि
द्राामितिभारतात्·मातरंपितरंजायांभ्रातरंसुहृदंगुरुंयमुद्दिश्यनिमज्जेत्तअष्टमांशंलभेतसइतिमार्कंडेयपुराणेदशमांश
मित्यन्यत्रपाठःप्रतिकृतिंकुशमयींतीर्थवारिणिमज्जयेत्तमज्जयेद्यमुद्दिश्यसोष्टभागफलंलभेतकुशोसिकुशपुत्रोसिब्रह्म
णानिर्मितःस्वयंत्वयिस्नातेसचस्नातोयस्येदंग्रंथिबंधनमितिमंत्रलिंगात्तदुंग्रंथिबंधनमेवतत्रतिकृतिबोध्याद्रंजीवदजीव
त्सर्वेविषयं·स्नानोत्तरंतर्पणश्राद्धे·तेचाकालेप्यथवाकालेतीर्थेश्राद्धंचतर्पणंत्र्यविलंबेनकर्तव्यंनैवविघ्नंसमाचरेदितिस्कां
देसर्वपितृतर्पणानंतरंआब्रह्मस्तंबपर्यंतंदेवर्षिपितृमानवाःतृप्यंतुपितरःसर्वेमातृमातामहादयःअतीतकुलकोटीनां

Indira Gandhi National
Centre for the Arts

सप्तद्वीपनिवासिनां आब्रह्मभुवनाल्लोकादिदमस्तु तिलोदकं· कामोदकप्रदानं ते मे पेतत्कथितं नृप पयहृत्वा प्रीणयन्त्येव मनुष्याः
६ सकलं जगादित्युक्तेरिदमपि कार्यं· येषां शाखिनां श्राद्धांगं तर्पणमस्ति तेस्तद्धेम श्राद्धपक्षे विप्रविसर्जनानंतरं कार्यं पक्ष
श्राद्धे हिरण्ये चाप्यनुव्रज्य तिलोदकमित्युक्तेः तर्पणक्रमस्तु ताततां वा त्रितयं सपत्नजननी मातामहादित्रयं सस्त्रिस्त्रीतनया
दितातजननीस्वभ्रातरस्तत्स्त्रियः ताताचात्मभगिन्यपत्यधवपुत्रजायापितामहगुरुः शिष्याप्ताः पितरो महालयविधौ तीर्थे
तथा तर्पणा इत्यभियुक्तोक्तः· अत्र सस्त्रीसुत्यास पत्नीकं मातामह पित्रादि वाक्यमुच्चारयंति तद्भ्रांत्या अत एवाग्रे तस्त्रिय इति पा
ठः अत्र समस्तं जलिमं आहृत्निरूचिता· सकृदेव मंत्रपाठो जलित्रयप्रदानं चेति केचित्· तीर्थे तिलतर्पणं च रविभौमशुक्रनंदास
प्तमीत्रयोदशीमघाजन्मदिनगृहशांतिषु विवाहे वर्षमुपनयने गर्भवर्षे चौले तदर्धं हि श्राद्धे मासमित्येवं निषिद्धेष्वपि का
लेषु कार्यं विधवया पुत्राभावे वस्त्रहमिव तीर्थे पितृतर्पणं कार्यं· तीर्थे श्राद्धं महाफलं पुष्करादीननुक्रमस्य सषु तीर्थेषु पुण्या राम
हं तत्कोटिगुणमिष्यते इति मात्स्यादिभ्यः तच्च स्नानतर्पणानंतरमविलंबेनैव कार्यं· रात्र्यादौ कृतभोजनेनापि तीर्थे श्राद्धं का ६

र्थमेव· निषिद्धकाले सायाह्नरात्र्यादौ तत्कार्यमिति शूलपाणिः· ततः सायाह्नदत्तं हिरण्यसमं विप्लवपवे ग्रहोपरागसंक्रांतितीर्थ
श्राद्धादिकं विनेति विष्णुरहस्य रघुक्रमित्यन्ये· एतच्चाकस्मिकतीर्थप्राप्तौ द्रष्टव्यं बुद्धिपूर्वं तु निषिद्धकालस्य तीर्थप्रवेशः का
र्यः· यदा तु प्राप्तदिने देवमानुषविघ्नेन तत्रातिबंधसदादिनांतरे कार्यं· यदा तु तेन विघ्नेन कृतश्राद्ध एव वहिः पातित दानच्छो
प एव· एष एव न्यायो मुंडनेपि· नैमित्तिकत्वेन साम्यात् तत्र तस्य मलमासेप्येतच्छ्राद्धं· तत्र रात्रावामश्राद्धं वा· अन्न श्रा
द्धं रात्रौ दोषमुक्तवत एतत्तीर्थप्राप्तौ परदिने एव. तथा वृद्धस्य पंच परीक्षेत तीर्थकालेन चिंतयेदिति पाद्मे· पातित्यादिदोषदुष्टस्य
त्याज्य एव तीर्थनिमित्ते श्राद्धे घ्रौवाह न हि जांगुष्ठनिवेशनतृप्तिमंत्रविकिरदिग्बंधाग्नौकरणानि न कार्याणि· तत्र तीर्थे जल
समीपे आमहेमान्यतर श्राद्धमेव· गृहादौ तु पक्वान्नेन पाकब्राह्मणासंभवे गृहे प्यामं· तदसंभवे हेमं· सदैव तु जलांते पु
आमं श्राद्धं प्रशस्ततरमित्युक्तेः तत्रामं चतुर्गुणं द्विगुणं वा अशक्तो सममपि· हिरण्यं त्वष्टगुणं चतुर्गुणं द्विगुणं वा अशक्तो वा
ह्मणभोजनसममपि· शूद्रस्य तु सर्वत्रामं नैव· आमश्राद्धे तृप्तिप्रश्नांगुष्ठनिवेशो जुषत्र श्रोपयासुखमिति अपोशानं

Indira Gandhi National
Centre for the Arts

७ चनं भवति हेमश्राद्धे पिंडदानं कृताकृतं विप्रालाभे तु पात्राभावे खिलं कृत्वापि तृयज्ञविधिं नरः निर्दिश्य प्राशनमुद्धृत्य पत्र
पात्रं ततो गतिः निधायैवं दर्भवटनासन्नेषु समाहितः एषानुमेषु संवद्धविधानं प्रतिपादयेत् तद्दन्नं च क्षिपेद् गोग्गवे दद्याप्सु
वानैव प्राशनस्य लोपोस्ति येन कस्य विशेषण इति देवलः आमादिश्राद्धे तु तदामादिकाल्लानरै ब्राह्मणाय देयं आमादिश्राद्धे सतिसंभ
वे पूर्वाह्णे स्ववश्राकस्मिके तु तीर्थप्रवेशे आदावपि सर्वथा श्राद्धाशक्तौ सक्तुसंयावपायसपिण्याकादिष्वन्यतमेन पिंडदान
मात्रं तीर्थे तत्राप्यशक्तो तिलतर्पणमुपवासो वा तीर्थश्राद्धे पिंडदानं जले एव प्रक्षेपः यत्र काश्यादावेकस्मिन्महातीर्थे वान
रतीर्थान्यन्येकानेक दिनेगम्यं तेत त्र संकल्पनिमित्तकं श्राद्धं तंत्रेण करिष्य इति संकल्पः व्यापकतीर्थे सैव संकल्पे उद्देश्य इन्द्रमध्ये पं
चक्रोशसीमायां स्थितो तु काशीमात्रनिमित्तकं तंत्रेवोचितं तैर्थिकवार्षिकयोरेकदिने प्राप्तौ तैर्थिकं कृत्वा वार्षिकं कार्यं दा
र्शिकादीनि प्रसंगात्सिध्यंति यदि तीर्थे आमश्राद्धादि तदा तन्निषिद्धैः कार्यं तेषां पक्वान्नसाध्यत्वात् यदिनान्यपि
अशक्तादिना ऽमेनैव चिकीर्षितं तदाप्रसंगात्सिद्धिः मुंडनं च श्राद्धमपि दर्श मासोत्तरं तीर्थयात्रायां वा चारात्तद् दृष्टौ तीर्थे च स राम
७

न्यस्तनाते च पतितेसति ये प्रशवपितादयस्तेभ्यो दद्यात्स्वपं तु तदृ इत्युक्ते जीवत्पितुः पितृतीर्थश्राद्धे ऽपि ह्यधिकारः अत्र पितृपितृमा
त्रादयस्तस्मात्तामहादयश्च देवता स्वमातामह्योपि पितृश्वशुरत्वेनैव मृतमातृकेण प्रसंगात्
यागमने मातृपार्वणमेव कार्यं न पितृपित्रादिश्राद्धं दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरपक्षिकं न जीवत्पितृकः कुर्यात् तिले
ः कृष्णोऽश्च तर्पणमिति निषेधात् न तु तच्छ्राद्धे हेशे न गयागमनं कार्यं गयाप्रसंगतो गत्वा मातुः श्राद्धं समाचरेदित्युक्तेः केचि
त्तु तस्य गयाप्राप्तिमुपपत्तिमिच्छंति आचाराद्यवस्थाय एवं च पितृपत्रिति तीर्थं वा इति निर्देशात्तदा गतेन पुत्रेण श्राद्धं कार्यमेव पित्रा
सह गतस्यापि तदावश्यकमेव लोक विहित्वा सुतर नाचारः यस्य तु पित्रादित्रयं जीवति स नैव कुर्यात् विधाया तु परिपु
त्र तीर्थे गतस्तदा श्राद्धं तर्पणं न कुर्यात् यत्तु पुत्रवमापि पुत्रासंनिधाने ब्राह्मणद्वारा संकल्प श्राद्धं कार्यमिति तन्निर्मूलं
अपुत्रयात् कार्यमेव नाहरयास्त्रियाऽनुपनीतेन च यथाचारं विप्रद्वाराकारणीयं अमंत्रकं वा नामगोत्राभ्यां स्वयं कार्यं दे
वेभ्यो नमः पितृभ्यः स्वधा नम इति मंत्राभ्यां वारिक्य हारीतस्वामिनः श्राद्धं कुर्यात् यति पतितादीनां तु श्राद्धे नाधिकारः

Indira Gandhi National
Centre for the Arts

८ श्राद्धं च गयातिरिक्ततीर्थे पृथगेवमेव · मातृमातामह्यादिपार्वणं पितृव्यादेरेकोद्दिष्टं च कृताकृतं · यदा मात्रादिभ्यो देयं तदा
पितुः पश्चिमभागे: मात्रादीनां पृथक् श्राद्धपक्षे तासां कृतसहगमनत्वे उभयोर्देशेन ब्राह्मण एक एव पिंडोप्येक एव · मृ
ताहनि मृततिथ्येकत्वे पूर्ववत्संक्षेपेणैव श्राद्धं तिथिभेदे तु पृथगेव · नव श्राद्धं तु पृथगेव दर्शादिष्वपि संक्षेपेणैव · अनेक
मातृकत्वे ऽप्येषां पृथक् पिंडस्तु सर्वासामेक एव महा    लयेप्येवं श्राद्धे तु पिंडं पृथक् कृतमपीच्छंति सापत्नमातामहादिस
पत्नीकानां पितृपितामहसापत्नमात्रोः । पितृभ्रातृसुताचार्यगुरुशिष्यसखिमातुलादिज्ञातिजामातृदौहित्रपुत्रतत्पत्नीलोक
निधमोदराणां स्ववंश्यसंततिपतिव्रताचार्यादीनां च श्राद्धं इति तत्र पितृभ्रात्रादीनामेकोद्दिष्टमेव · तत्र पितृमातामहपार्वणं आ
वश्यकं अन्यत्तु न तथा · गयायां तु सर्वमप्यावश्यकं अनेकपार्वणानामेकोद्दिष्टानां च युगपत्प्राप्तौ तंत्रेण अपपादेकं च तंत्रे
ण · पार्वणोत्तरं चैकोद्दिष्टं अशक्तौ तु पार्वणैकोद्दिष्टयोस्तंत्रं · तीर्थे एकब्राह्मणेपि सर्वैकोद्दिष्टान्यशक्तौ पिंडभक्त पृथगे
व पित्रादिपार्वणे त्वप्येक एव ब्राह्मणो शक्तौ · पक्षदानादिनाप्येतो ॰ स्वार्थे तीर्थयातिस प्रथमं जमान पित्रादेः श्राद्धं दत्वास्व श्रा
८

पितृभ्योपि दद्यात् · विधवा तु स्वभर्तृपार्वणं स्वपितृपार्वणं च कुर्यात् सधवा हि तु स्वभर्त्रैकोद्दिष्टमेव · श्वशुरे जीवति भर्तृपितामहप्रपि
तामहेभ्यो दद्यात् उभयोर्जीवतोर्भर्तृतत्पितामहप्रपितामहेभ्यः स्वपितरि जीवति द्वारलोपात् पार्वणलोप एव श्वश्रूमाता
महयोः स्वमातुर्मातामह्याश्च पार्वणं कृताकृतं · यत्तु पितृमातामहादीनां सपत्नीकानामिसुच्चारणेन श्राद्धमिति तत्र विनापि
तदुक्तेरेवं तदनुयापितया तच्छ्राद्धेन तासामपि तृप्तेः स्वेन भर्त्रा सममं श्राद्धं माता भुंक्ते सुधासममिति देवलात् · स्वेन भर्त्रा सममंभ
र्तुर्दीयमानं श्राद्धं मातापि भुंक्ते इति तदर्थे: एवं च मातृमातामह्यादिश्राद्धमनावश्यकमेव · जीवत्पितृकविषये विष्णुः पित
रि जीवति यः श्राद्धं कुर्याद्येषां पिता कुर्यात्तेषां कुर्यात् पितरि पितामहे च जीवति येषां पितामहः त्रिषु जीवत्सु नैव कुर्यात् य
स्य पिता प्रेतः स्यात्स पित्रे पिंडं निधाय पितामहात्पराभ्यां द्वाभ्यां दद्यात् पितापितामहश्च प्रेतौ स्यातां स ताभ्यां पिंडं दत्वा
पितामहपितामहाय दद्यात् · यस्य पितामहः प्रेतः स्यात्स तस्मै पिंडं निधाय प्रपितामहात्पराभ्यां द्वाभ्यां दद्यात् यस्य पि
ता प्रपितामहश्च प्रेतौ स्यातां स पित्रे पिंडं निधाय पितामहात्पराभ्यां द्वाभ्यां दद्यात् · मातामहानामप्येवमिति अत्र यत्तु

Indira Gandhi National
Centre for the Arts

वाभ्यांपितृसंबद्धाएवमात्रादयोमातामहादयश्चपितृमातृत्वादिनाजीवत्पितृकस्यतीर्थश्राद्धेदेवताःस्वमातुःस्वमातामह
८ हस्यचपितृपत्नीत्वेनतच्छ्वशुरत्वेनचदेवतात्वं·तदप्येकोद्दिष्टमेव·पितुस्तस्यैवप्रामेर्यस्यपितामहेन:स्यादित्यादिमतपि
तृकविषयमितिस्पष्टमेवतद्विषयेएवमातामहानामहाप्राप्तेः:नजीवत्पितृकःकुर्याच्छ्राद्धमग्निमृतेद्विजः·येभ्यएवपिता
ददात्तेभ्यःकुर्वीतसाग्निकइतितुपिंडपितृयज्ञविधिविनाश्राद्धनिषेधपरमितिकेचित्·अन्येत्वेनद्वलाद्येतस्याग्नेर्भया
ग्निरहितस्यजीवत्पितृकस्यश्राद्धेनधिकारएव·अग्निहीनस्यपिंडपितृयज्ञविधानेनश्राद्धप्राप्तेस्तद्धेपर्युदपतेरित्याहुः·प
दाजीवत्पितृकोपिपितृनियुक्तसत्फलार्थमेवतीर्थयात्रांतत्रयजमानस्यपितुरिमादिवाक्यरचनयाप्रथमंश्राद्धंकृत्वा
स्वस्यापिप्रसंगतस्तीर्थप्राप्तिनिमित्तसत्वात्तु:पित्रादीनामितिवाक्यरचनयाश्राद्धांतरमपिकार्यंएवंयदामृतमातृकः
पितृप्रेरणमातृतत्फलार्थंगयांयातितदानेनप्रथमंयजमानपत्नीत्वेनमात्रेएकोद्दिष्टंकृत्वापितृपत्नीत्वेनैकोद्दिष्टंकार्यं
ततोमातृमात्रपार्वणमपिकार्यं·प्रसंगात्स्वगयालाभेपितृपत्नीत्वेनैकोद्दिष्टंकृत्वामातृत्वादिनामातृमात्रपार्वणमपिकार्यंग राम ५

याभिन्नतीर्थेतुयथायोगंयजमानपत्नीत्वेनपितृपत्नीत्वेनवैकोद्दिष्टमेवमातुर्नेतुपार्वणंअन्येतुजीवत्पितृकस्यगयायां
श्राद्धनिषेधात्पितृपितृत्वादिनाश्राद्धंनास्त्येवेत्याहुः:मातरिमातामहेमातामह्यांवाजीवंतितत्तन्नामार्वणलोपएव·वि
स्तरेणश्राद्धकरणाशक्तोपित्रादीन्सर्वानुद्दिश्यैकःपिंडोदेयइतिकेचित्·तीर्थेमृतास्थिप्रक्षेपोमृतस्यस्वर्गदः:गंगायांव
त्सलोकदइत्यत्रविस्तरः·अस्थिप्रक्षेपंगयाश्राद्धंश्राद्धंचापरपक्षिकं·प्रथमेब्देनकुर्वीतयदिनस्यात्सपिंडनं·कृते
पितुःसपिंडनेइतिकश्चित्पठतिप्रथमेब्देपिकुर्वीतकृतंत्वपरपक्षिकं·प्रथमेब्देनकुर्वीतयदिनस्यात्सपिंडनं·कृतेपितुःस
पस्योर्ध्वंदेहिकमित्यन्यत्र·पूर्वार्धंतुसमं·यदिस्याद्भक्तिमान्सुतइतितुपाठमन्येपठंति·दशाहाभ्यंतरेतीर्थेऽस्थि
प्रक्षेपस्तुप्रशस्ततरःदेवदर्शनेप्रणामेचअग्रेमृत्युमवाप्नोतिस्पष्टएवपचयःस्मृतः;वामभागेभवेन्नाशोदक्षिणेसर्व
कामदः:शिवितत्वग्रेपिपेषुतीर्थेषुयेदेवापेषुतीर्थेषुयेद्विजाः:येषुतुर्थेषुयत्तोयंविचिकित्सेन्नतत्रतुइतिब्रह्मएनेषू
पहतेष्वपितद्दोषइत्याशयः·यदन्यत्रकृतंपापंतीर्थयात्रानघातिसर्वंयात्रतीर्थकृतमन्यत्रकचित्पापंप्रमोहतिइतिपाद्मे·

Indira Gandhi National
Centre for the Arts

गाकृतेपिगृहेतुयत्कृतंपापंतीर्थस्नानेनशुध्यति·कृतेतत्रयत्पापंवज्रलेपसमंहितदितिब्रह्मवैवर्तेपिअन्यक्षेत्रे
१० कृतंपापंपुण्यक्षेत्रेविनश्यतिपुण्यक्षेत्रेकृतंपापंगंगातीरेविनश्यति॥गंगातीरेकृतंपापंवाराणस्यांविनश्यतिवारा
णस्यांकृतंपापमविमुक्तेविनश्यति·अविमुक्तेकृतंपापमंतर्गृहेविनश्यतिअंतर्गृहेकृतंपापंवज्रलेपोभविष्यति
वज्रलेपपछिदंद्येतंपंचक्रोशप्रदक्षिणामितिअत्रगंगातीरंवाराणस्यनवच्छिन्नंएवंचकाशीसर्वतीर्थानीर्थकृत
पापनाशिकादर्शनमात्रेणअन्यक्षेत्रेकृतंपापंपुण्यक्षेत्रेविनश्यतिपुण्यक्षेत्रेकृतंपापंवाराणस्यांविनश्यतिवारा
णस्यांकृतंपापंगंगातीरेविनश्यतिगंगातीरेकृतंपापमंतर्गृहेविनश्यतिअंतर्गृहेकृतंपापंवज्रलेपोभविष्यतीत्यसमग्रो
क्तेःअत्रगंगातीरेकृतंपापंगंगास्नानेनशुध्यतीतिभविष्यपुराणोक्तेरिदमंतर्गृहस्तुत्यर्थं·गंगेतिकीर्तनंचतन्नाशकंगंगा
गंगेतियन्नामयोजनानांशतेरपि॥स्थितेरुच्चारितंहंतिपापंजन्मत्रयार्जितमितिविष्णुपुराणाच्चअंतर्गृहेकृता
नामपिपापानांपंचक्रोशीयात्राप्रायश्चित्तं·ज्ञानस्वरूपाकाशीयंपंचक्रोशीपरामिताजस्याः प्रदक्षिणंकृत्वासर्व राम
१०

पापैःप्रमुच्यते·क्षेत्रेकृतानांपापानांप्रायश्चित्तंनचेतरदितिब्रह्मवैवर्तात्·अल्पमपापाससाध्यापान्यपितस्यावस्तुमाहा
त्म्यात्सर्वपापनाशकत्वंनानुपपन्नंसतेनपंचक्रोशीयात्रायांपचप्राजापत्यानिकल्प्यंतःपरास्ताःधनिकानामेतत्सहि
तंगृहदानंसर्वप्रायश्चित्तंवाराणस्यांगृहंकृत्वाब्राह्मणायप्रयच्छतिकाश्यांकृतानांपापानांकापवादस्तस्यांखलु·ना
शःपरोपसंदिष्टःशुभकृद्यास्तिमन्तेइतितत्रैवोक्तेःकाश्यांजलाशयकरणंजीर्णजलाशयोद्धारश्चास्तंतपापनाश
यपुण्यायचेत्यपितत्रैव·पंचाद्दीनांकेवलगृहदानमपिसर्वप्रायश्चित्तमित्यपितत्र·एवंगंगास्नानविष्णुस्मरणोतम्र
कानांसर्वप्रायश्चित्तंनचतत्साधारणं·तावतास्तत्प्रभावात्·नचेतरदित्यायुक्तिस्तुतयोर्भक्त्याभावचवन्मुरुषपरा·मन्वा
द्युक्तप्रायश्चित्तानांतद्विषयतायास्तथाभियुक्तैरुक्तत्वात्·विष्णुस्मरणमुपक्रम्यप्रायेणवेदतदिदंनमहाजनोयंदेव्या
विमोहितमतिर्वतमाययाऽलं·त्रय्याजडीकृतमतिर्मधुपुष्पितायांवैतानिकेमहतिकर्मणियुज्यमानइतिभागवतात्·
महाजनोमन्वादिःनवेदविष्णुस्मरणस्यसर्वप्रायश्चित्तत्वंनवेदेत्यर्थःतत्रहेतुर्मायाविमोहितत्वं·पद्मामहाजनोलोकः

Indira Gandhi National
Centre for the Arts

त्र्यां जडीकृतमतिः सन्नव कुवित्तमयापासस्साध्यत्वेनमहतिवेतानिकेकर्मणियुज्यमानः अहृत्युर्नेनुविष्णुस्मरणाद्यावनःअ
न्याभावात्तान्त्रतीदंनोक्तवानिमित्तत्वं : तथासंनिकर्षोऽत्रमर्मोनामना रणकारणंगांगहित्वा यथाऽन्यांभस्तत्रसोपातिशु
२२ द्धये इतिभागवतेऽक्तं· भविष्येस्नानमात्रेणगंगायांपापंब्रह्मवधोद्भवं·दुराधर्षंकथंयातिचिंतयेद्योवदेद्दपितस्याहं भद्
हे पापंकोटिब्रह्मवधोद्भवंस्फतिवादमिमंमत्वाकुंभीपाकेषुजायते· श्रीकल्पंनरकंभुक्त्वाततोजायेतगर्दभः तीर्थमन्य
त्रशंसंतिगंगातीरस्थितास्त्रपिपंडितंमन्यमानायेतेवैनिरयगामिनइति·कालिकापुराणेगंगांमाप्यापियेमन्नोः शुद्धांभ
क्तिंनकुर्वंते·तीर्थान्तरे रतिंकुर्युस्तेवैनिरयगामिनः सर्वोत्तमांमहादेवींसर्वोत्कृष्टांवरप्रदां अन्यतीर्थसमांब्रूयुस्तेवैनिरय
गामिनः चरः श्रेष्ठोमोक्षः।स्कांदेगंगांतीर्थेतीपरित्यज्ययेन्यतीर्थाभिलाषुकाः।ब्रह्महत्याफलंतेषांसततंसंशयात्मनामि
तिपद्मदेवलौ· सेवस्थमुद्धृतंवापि शीतमुष्णमथापिवाः गंगांतुहरतेतोयंपापमामरणांतिकमितिअनेकजन्मार्जितमपी
तिशेषः।लिंगेब्रह्महागुरुहागोघ्नः स्वर्णहृद्गुरुतल्पगः गंगांभस्यातुपूर्येतेनात्रकार्याविचारणेति·सकलप्रायश्चित्तय राम

११

यातीतानांगंगाजलस्पर्शमस्तनांसगरपुत्राणामुद्धारस्सरामायणेसर्वपुराणेषुश्रवणाच्च योगियाज्ञवल्क्यः एतावनाप
मस्तीहयन्नाम्नानहतंहरेः। अतिरेकभयादाहुः प्रायश्चित्तांतरंवृथेति· श्रवनः श्रुतिस्मृतिपुराणेषुरामनाम्नसमी
रितं सर्वेषामेवपापानांप्रायश्चित्तमिदंस्मृतमितिअपवित्रः पवित्रोवासर्वावस्थांगतोपिवाः यः स्मरेत्पुंडरीकाक्षं सबा
ह्याभ्यंतरः शुचिरितिपाद्माद्देअपवित्रः आचरितपापकर्मा· पवित्रः अताहशोनाचरितस्नानादिः सर्वावस्थाविष्णो
र्भक्तिकावस्थाः स्मरणंचसर्वजगद्विष्णुः सर्वकारणंसत्रहमपिसइति ज्ञानं·पराशरादिसंहितासुसर्वथावादंहरेर्ना
म्निसंभावयतियोजनः सपापिष्ठोमनुष्याणांनिरयेपततिस्फुटमिति·विष्णुपुराणेपिकलिकल्मषमत्युग्रनरकार्ति
मदंनृणांप्रयातिविलयंसद्यः सकृद्यत्रानुसंस्मृतेससर्वः सर्वविद्सर्वस्वरूपोरूपवर्जितः सर्वभूतस्थसर्वात्माकीर्तितं
भगवान्हरिरितिकिंच·नयुष्मेवाजवंधवोनिनित्तुष्व्यनसमर्त्त्यः अवद्यमधिदीधरदितिमंत्रोपिमहतांनामकीर्तनस्य
पापनाशकत्वमाहतथाहिवाजमिमन्नानामअन्नदानेनयेसर्वेबंधवस्तेषांसंबोधनंहेवाजबंधवः युष्मेयुष्मासुत्र

Indira Gandhi National
Centre for the Arts

धिः समर्थोनुवादी समासस्तकवाकुलकान्न· नि निस्तुष्वन· निंदनेच्छाशीलोपि मर्त्यः अवद्यं पापं न धारयति· भवदनुस्तथा
१२ नमात्रेणानिष्पापत्वात्· निनिस्तुरपीत्युत्स्य किमुत निंदन् किमुतस्तवन्निति गम्यते· तावपि पुराव श्लोकनामस्मरणं तो
शुद्धो सुतरां स्तोतेति तदर्थः अस्याश्वमेधनाम्नो राज्ञो दानस्तुतिरियं· एवं च जगत्पालकस्य भगवतो नामसंकीर्तनं सर्व
पापनाशकमिति केमुनिक्रून्यायसिद्धमपि च तमुस्तोतारः पूर्व्यं यथाविदन्नृतस्य गर्भं जनुषापि पर्त्तन आस्य जा
नंतो नाम चिद्विविक्तन महस्ते विष्णो सुमतिं भजामहे इति मंत्रोपि भगवन्नामकीर्तन सज्ञानमदत्वमाह अस्यार्थ
:इतिछंदः ; पूरणाय· हे जानतः कुशला ; नदेवं· अस्ति कश्चिदीश्वर इत्यावाज्ञंपसिद्धं पूर्व्यं पुरातनं सर्वकारणं
ऋतस्य वेदस्य गर्भं सकलवेदप्रतिपाद्यं स्तोतारः स्तध्वमिति मन्यपविपरीणामः यथाविदो यथाविदतितथा स्त
ध्वं श्रौतपौराणतांत्रिकपौरुषेयशब्दैः ततस्तुतिप्रतिपादके यथाज्ञानं स्तध्वमित्यर्थः। भागवते सवेरुद्धावचैः स्तो
त्रैः पौराणे प्राकृतेरपीत्युक्तेः एवं स्तुतिं जनुषा जन्मनापि पर्त्तन· तनश्छांदसः पितृतजन्मानि समापयत मुक्तिप्राप्ते राम

१२

त्यर्थः यद्येवं स्तोतुमसमर्थास्तर्हि अस्य विष्णोर्नाम चित् नामापि त्रात्विविक्तन संकीर्तयत कीर्तनफलमाह हे विष्णो
तेमहः महस प्रकाशस्वरूपस्य प्रकाशिका मितिशेषः सुमतिं भजामहे लकारभेत्यपः स्वं च तत्त्वज्ञानमाशास्म
नाः कीर्तयतेत्यर्थः विधिशक्तिर्नेमंत्रस्य नियोगेनापनीयते स्वतो विधास्मतिहेयनियोगात्स्मारयिष्यतीति भट्टाः
त्राः पनीयेपि· तान्स्त्रजापतिरब्रवीदेभिर्मंत्रैः स्तध्वं ततो देवः मीतो भवति स्वात्मानं दर्शयति तस्माद्यतेमंत्रैस्तो
तिस्तोम्रत्वं च गच्छतीत्यार्या विभावयंतु तथा ऋग्विधाने· वेदाक्षराणि यावंति पठितानि द्विजातिभिः तावंति हरि
नामानि कीर्तितानि न संशय इति अनेन सर्वनाम्नां श्रुतिसमत्वमिति सूचयति अत्यापासाध्यस्यापि महापुराय
जनकत्वमत्यत्सुराविंदुपाशनस्य महापापजनकत्ववन्नानुपपन्नं कीर्तनं च तत्त्वावबोधपर्यवसायि श्रवणपरं
तेन निदिध्यासनांतेत्याभः ; यद्यप्येतत्काशीवासस्यावश्यकर्तव्यत्वार्थमुक्तं तथापि तुल्यन्यायादन्यविषयेपि बो
ध्यं इति प्रायश्चित्तं तीर्थविषयं· गंगायमुनयोर्श्वेवसंगमोत्तोकं विश्रुतः सर्वैव काम्यिकस्तीर्थस्तत्रस्नानेन भक्तितः

Indira Gandhi National
Centre for the Arts

भोगकामस्य भोगाः स्युः राज्यं स्याद्राज्यकामिनः यस्य यस्यानुयः कामस्तस्य तस्य भवेद्धि सः इति भविष्यपुराणे। अथ प्रया-
१३ गमरणविचारः। तत्र स्कान्दे यथाकथंचित्तीर्थेस्मिन्प्राणत्यागं करोति यस्तस्यात्मघातदोषो न प्राप्नुयादीप्सितानपि
तन्मूलकमेव शास्त्रादिनामरणमाधुनिकानां कौर्मे० रुग्णदीनक्रुद्धानामक्रमः गंगायमुनमासाद्य यस्तु प्राणान्
परित्यजेत् ईप्सितांल्लभते कामानिति पाद्मे विष्णुः देहत्यागं तत्र वीराः कुर्वन्ति मम सन्निधौ मत्तनुं प्रविशन्त्येव पुनर्ज-
न्म न ते नराः कौर्मे वटमूलं समाश्रित्य यस्तु प्राणान्परित्यजेत् सर्वलोकानतिक्रम्य रुद्रलोकं स गच्छति गंगायमुनयो-
र्मध्ये कर्षाग्निं यस्तु साधयेत् अहीनांगोप्यरोगश्च पंचेन्द्रियसमन्वितः यावन्ति रोमकूपाणि तावत्स्वर्गे महीयते अधःशि-
रास्तु यो ज्वालामूर्ध्वपादः पिबेन्नरः। सूर्यलोकमवाप्नोति सूर्येण सह मोदते जलमध्ये शवः कुर्यात्संगमे लोकविश्रुते
सोमलोकमवाप्नोति सोमेन सह मोदते यः स्वदेहं विकर्तित्वा शकुनिभ्यः प्रयच्छति शतवर्षसहस्राणि स्वर्गलो-
के महीयते मात्स्ये उर्वशीपुलिने रम्ये विपुले हंसपांडुरे कोटितीर्थे च रम्ये च यस्तु प्राणान्परित्यजेत् वर्षसहस्राणि राम
१३

स्वर्गे लोके महीयते ऽसमर्थेकमुक्तं तथा शरण्यु राजन्प्रयागे तु अनाशकफलं महत् मुच्यते सर्वपापेभ्यो गच्छेच्च परमं प-
दं इति पंचयोजने प्रयागमंडले यत्र कापि प्राणत्यागस्य महाफलत्वमुक्तं तत्र ब्रह्मपुराणे ध्यात्वा विष्णुपदांभोजं प्र-
यागे विष्णुतत्परः तनुं त्यजति वै मर्त्यो न तस्य मुक्तिर्न संशयः श्रुतिरपि परिशिष्टे सितासिते सरिते यत्र संगते तत्राप्लुतासो
दिवमुत्पतन्ति ये वै तन्वं विसृजन्ति धीरास्ते जनासो ऽमृतत्वं भजन्ते इति यत्र गंगा च यमुना यत्र प्राची सरस्वती यत्र सो-
मेश्वरो देवस्तत्र माममृतं कृधीन्द्रायेंदो परिस्रवेति च परिच परिशिष्टे भारतमात्स्यकौर्मादिषु न लोकवचनात्तेन
वेदवचनादपि मतिरुत्क्रमणीया ते प्रयागमरणं प्रति इति तत्र मरणनिषेधकं वेदवचनं तस्माद्गृहन्पुरुषः स्व-
कामी प्रेयादिति स्मृतिरप्येतदर्थिका सा। अत्र स्वःकामी न प्रेयादित्यनेन स्वर्गकामस्य शास्त्रेणाविहितं यन्मरणं तन्नि-
षिध्यते अस्मरस्वारस्यात् तस्य जीवनाय ज्ञानादिभिरपि साधयितुं शक्यत्वादिति दान शायः एवं च तत्र प्रयागमरणे काम्यार्थसि-
द्धौ दीर्घश्च मुमुक्षोयं अत एवं च पदत्राय समर्थस्य तदनधिकारिणो वा तत्र प्रवृत्तिरुचितैव तदधिकारिणोपि स्वर्गेमेशी ब्रंभ

Indira Gandhi National
Centre for the Arts

१४ व त्विन्युक्तदेशावतो दोषज्ञानेपि प्रवृत्तिर्भवति परं तु तस्य दोषो युक्तः श्रुतिवशात् एवमेव सहगमने स्त्रीणां सर्वस्वारयज्ञे च यज
मानस्याग्निप्रवेशे प्रवृत्तिः ये तु आयुःशेषेण कदाचित्तत्त्वज्ञानसंपत्त्या मोक्षस्यापि संभवादनित्यात्स्वर्गसुखार्थमायुषः
प्राक् प्रयागे त्यागो नार्थीति श्रुत्यर्थं वदंति तेषां मत एव अश्रुतोरेरलाभान्मुक्तः कामिनो मोक्षार्थित्वाभावाद्यस्तु कामिन एव निषेधा
त्मोक्षकामस्य तन्निषेधः प्रयागमरणेनापि तत्त्वज्ञानद्वारैव मोक्षो नान्यः तमेव विदित्वेति श्रुत्या न विरोधः ब्रह्मज्ञानेन मुच्य
ते प्रयागमरणेन वेत्यत्र ब्रह्मज्ञानपरं करणमुन्यत्यात्मादमारिपरं तेरि एवं प्रयागमरणेनापि श्रवणादिद्वारा शीघ्रं ब्रह्मज्ञा
नोत्पत्तेरज्ञानेन विरोधः प्रयागे वा भवेन्मोक्षः इह वा मत्परिग्रहात् प्रयागादपि तीर्थाग्र्यादिदमेव विशिष्यत इति काशीप्र
करणस्य वाक्यं तु काशीमरणे धीरत्वगुणनैपेक्ष्येण तदनपेक्षात् नैव विशिष्य बोधनपरं प्रयागमरणे ब्राह्मणस्य नाधिका
रः स्त्र्यादिष्वस्य त्रिप्रावेश्या त्रंत्यनाश्रतया धमाः एते मते पुः प्राणान्स्वयं जहीयित्वाहि जंतः पंपतिता वा ब्राह्मणस्तत्र ब्रह्महा
वात्महा भवेदित्युक्तेः द्विजपदं वा अशेषार्हि मपरं न लोकवचनादित्यादेराग्रेयस्य सवसिष्ठसंबोध्यप्रवृत्तावपि तद्धि राम
१४

षयत्वे मानाभावात् ब्रह्महा चात्महा भवेदित्युक्त्याऽन्येषामप्यात्मघातदोषोऽस्त्येव यज्ञेषु पशुहिंसाजन्यपापवत् एवं चान्य
त्र प्रयंचितं फलस्य महत्त्वाद्यत्र वनत्रापि अन्येषां प्रवृत्तिः ब्राह्मणस्य महादोषश्रवणादन्यजातेरेवोचितान्यन्येन तस्य निर्मूलत्वा
त्सर्वेषां वर्णानां तत्राधिकार आहुः तु प्रशोचक्रियस्य सत्यारम्भात् भिषक्क्रियाहृद्विप्रादेरत्र मरणाविधौ न विवादः परंतु
तन्मरणस्य कलिवर्ज्येषु परिगणनात्तां प्रतत्मनधिकार एव विष्णुधर्मोत्तरेपि व्याधितो भिषजा त्यक्तोऽ पूर्णेश्वायुषि चात्मनः यथा
युगानुसारेणासंत्यजेदात्मनात्मनुमिति यत्तु व्याधितद्वाद्युपक्रम्य तस्मिन्काले तनुत्यागाद्यथोक्तफलभाग्भवेत् आयुष
स्त्र पूर्णे इह मरणं ब्राह्मणस्य च क्षत्रियस्य तु संग्रामे मृते भर्त्तरि योषितः सर्वोह्यप्राप्तकालेपि गतिमग्र्यामवाप्नुयात् इति वि
ष्णुधर्मोत्तरे यथोक्तफलभागित्युक्तेः फलार्थविहितप्रयागमरणे आतुरादेरेवाधिकारो न त्वन्यस्य सोपि युगांतरे एव न तु क
लौ युगानुसारेणेत्यत्रैवोक्तेरहीमांगोप्परोमश्चेत्यादेरपि शङ्खचरितत्वात् स्वार्थे नात्यर्थमित्याहुः गर्भिण्या बालापत्या
याभर्त्रानुज्ञाताया स्त्रिया अनधिकार उक्तः सर्वसंमतः इत्यलं पल्लवितेन इति प्रयागनिर्णयः श्रीगंगाकाश्योर्मा स

Indira Gandhi National
Centre for the Arts

तत्वमुक्तं मनुना॰ यमो वैवस्वतो राजा यस्तवैष हृदि स्थितः तेन चेदविवादस्ते मा गंगां मा कुरून् गम इति॰ यम यति नियमयतीति यमः
१५ अंतर्यामी य आत्मानमंतरो यमयति एष त आत्मांतर्याम्यमृत इति श्रुतेः वैवस्वतो विवस्वद्दिद्योतो राजा स्वप्रकाशः यस्तवैष हृ
दि स्थित इति स्वानुभवमन्वेयं तस्याहः ॥ अंतः प्रविष्टः शास्ता जनानामिति श्रुतेः तेन परमात्मना ऽविवादः ऐकात्म्यं यद्यस्ति तदा
मा गंगां मा कुरून् गच्छ अन्यथा तेन ऐकात्म्यज्ञानं प्राप्तये तत्रैव तिष्ठेति तद्भाव: अत एव गंगायां मरणं चैव हृद्धा भक्तिश्च के
शवे॰ ब्रह्मविद्याप्रबोधश्च नाल्पस्य तपसः फलमिति वेदव्यासेनोक्तं॰ मरणे स्मरणं विष्णोः कथ्यते मं तदुर्लभं॰ तदल्पेन हि
कालेन गंगां संसेव्य लभ्यत इति च॰ कुरुशब्देनात्र काशी॰ तथा च तापनीये जाबाले च श्रूयते॰ बृहस्पतिर्याज्ञवल्क्यं पप्रच्छ यद
नु कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनमिति स होवाच यदनु कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां
ब्रह्मसदनमविमुक्तं वै कुरुक्षेत्रं देवानां देवयजनं सर्वेषां भूतानां ब्रह्मसदनं तस्मा॰ यत्र क्वचन गच्छति तदेव मन्येत देवा
नां देवयजनं सर्वेषां भूतानां ब्रह्मसदनमत्र हि जंतोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृती भूत्वा मो राम
१५

सी भवति तस्मादविमुक्तमेव निषेवेत अविमुक्तं न विमुंचेत् एवमेवैतद्याज्ञवल्क्येति॥ अथ हैनमत्रिः पप्रच्छ याज्ञवल्क्यं
य एषोऽनंतोऽव्यक्त आत्मा तं कथमहं विजानीयामिति स होवाच सोऽविमुक्त उपास्यो य एषोऽनंतोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठित इति सोऽविमुक्तः कस्मिन् प्रतिष्ठित इति वरणायां
नास्यां च मध्ये प्रतिष्ठित इति का वै वरणा भवति का च नासीति सर्वानिंद्रियकृतान्दोषान्वारयतीति तेन वरणा भवति सर्वानिंद्रियकृ
तान्पापान्नाशयतीति तेन च नासी भवतीति कतमच्चास्य स्थानं भवतीति भ्रुवोर्घ्राणस्य च यः संधिः स एष द्यौर्लोकस्य परस्य च संधिर्भवतीति एतद्वै
संधिं संध्यां ब्रह्मविद उपासत इति सोऽविमुक्त उपास्य इति सोऽविमुक्तं ज्ञानमाचष्टे यो वै तदेवं वेदेति॥ अनु यस्तिष्ठं कुरुराट्ः प्रा
पवाची कुत्सितावरणजनकत्वात् सक्षेत्रं सर्वपापापनोदकं देवानामपि देवयजनं ब्रह्मोपास्तिस्थानं सर्वे
षां भूतानां भवंति उत्पद्यंते तानि भूतानि उत्पत्तिधर्मकाणि जरायुजांडजस्वेदजोद्भिज्जानि तेषां ब्रह्मसदनं ब्रह्मप्राप्तिकरं
स्थानं अत एवोक्तं पौष्करे॰ इदृशी तत्रैव ब्रह्मसदने समे निस्तृणकंटके॰ प्राज्यैधनतृणे देशे पुण्ये पर्वतरोधसि॥ वासमत्र प्र
कुर्वंति दृष्टा भगवतः क्रियां॥ तपोऽर्थिनो महाभागा ब्रह्मचर्यव्रते स्थिताः॥ गृहस्थधर्मनिरता जितक्रोधाः समाहिताः॥

Indira Gandhi National
Centre for the Arts

पतयश्चापिकोसंति धर्मेरोहविकासिपाः॥ वन्येः कर्मफलेश्चैव रता ब्राह्मणपुंगवाः॥ आग्निहोत्रव्रतस्नाता जितक्रोधीः स
माहिनाः॥ देवयुक्तेन वा युक्ताः कर्मणा ब्रह्मसत्तमाः॥ चीरवल्कलसंवीता नियता निपतेद्विपाः॥ इति॥ तत्रैवरोधसिसमीपेभ
१६ गवतः क्रियागस्यागतिरूपांतर्यामिनः तपश्चालोचनेन। अत्र हि जंतोरिमादिभवतीत्यंत स्फतिप्रसिद्धमोक्षहेतुतत्त्वज्ञानार्थि
नइत्यर्थः॥ दानयागेन मुमुक्षुं मात्रेनेदेप्रशोधनेच्चसत्युउतस्वरूपंदानमिति॥ यतयइति संन्यासिनां ग्रहणं॥ चौः स्मृतौ॥ यतयोपि
इहकांसंतिवासमित्यनुषज्यते॥ तेषामपि अविमुक्ते विष्णुनां विहारोनैव निषिद्ध इति काशीतोन्यत्रगमननिषेधात्॥ विकासि
पाः। विशेषेणकांक्षा द्ध्यातइंतः॥ इह वस्त्रमिव ब्रह्मसदनेउक्त स्फतिप्रसिद्धेवारापासंगतेऽविमुक्ते तत्रैवेति विशेषणमाध्या
त्मिकध्यानधारणाख्यब्रह्मसदननिरहस्यर्थे॥ तदुपास्त्यनधिकारिणामेवम स्कतत्वात्॥ सेत्रमेवात्र ब्रह्मसदनशास्त्रार्थः॥ प
वृत्तस्य विघ्नस्य समर्थः वान मस्याश्चापि रातदेवकासंतीत्याह व मोरितिह्याभ्यां सतेपि इह वा से कां संती त्यनुषज्यतेति तदर्थः। किमि
तिप्रश्ने उत्तरं अनुप्रसिद्धं यत्तथा प्रसिद्धं तदविमुक्तमेव इश्वरं णाकदाचिदपिमुक्तं न भवतीत्यविमुक्तं वेरावाथि तस्मादस्य त्र राम
१६

पत्रकचयत्रकापि मोक्षेच्छया न गच्छति न गच्छेत् लेदृ तदिदमेवदेवयजनत्वादिगुणविशिष्टं कुरुक्षेत्रपदवाच्यं मन्ये। अवगच्छामि
तत्र हेतुमाह। हि यतः। अत्र जंतोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृती भूत्वा मोक्षी भवति मुक्तो भवति त्रेलेव
तत्त्वमस्याद्यैक्यबोधकं आचष्टे उपदिशति। येनासावमृती ब्रह्मरूपो निवृत्ताज्ञानतत्कार्यो वाभूत्वा मोक्षी भवति मुक्तो भवति त्रेलेव
सन्ब्रह्माप्येति विमुक्तश्च विमुच्यत इति श्रुतेः। विस्तरं घ्यादत्तः तस्माद्धेतोर विमुक्तमेव निषेवेत नत्यजेदामरणांतिकं यद्या अवि
मुक्तं तत्त्वार्थं रुद्रं तारकमदात्तारं निषेवेत आचार्योपासनस्य विद्यागत्वात् एवमेवैतद्वगंतव्यमिति रहस्यमिति एषो याज्ञवल्क्यः
सत्यह मुवाचेति। अविमुक्तमिदमुक्तादिशं संसारनाशनं॥ नान्यत्रनिवसेत्प्राज्ञः क्षणमात्रमपि प्रियेत्वत्रैवोत्क्रममाणस
जंतुमात्रस्य केवलं॥ वेदवेदांतसारस्य प्रणवाख्यस्य पार्वति॥ ब्रह्मणस्त्वर्थभूतोहं संसारद्रावको विराट्॥ आनंदं सत्यचिद्रू
पं तारकं तमसः परं०॥ स्वयंभांतं निराधारं दासामि प्रत्यगात्मना॥ येनैकाशुमहत्तदुःखं प्राणोशेषं महेश्वरि। परित्यज्य स्वरू
सारं परानंदो भवेच्छिवे इत्येतच्छुत्यर्थानुवादकपराशरोपपुराणात्। अथ हैनमित्यादेरयमर्थः। कथ्यमित्यसक्केत्यर्थः अवि

Indira Gandhi National
Centre for the Arts

मुक्तेमतिष्ठितइत्युत्तरानुसारात्‌ अविद्याकल्पितावच्छेदो जीवो ऽविमुक्तः नविमुक्तो देहबंधेनेतियोगात्‌ तत्र परमात्मा प्रतिष्ठितस्ता
१७ दात्म्यात्‌ अविमुक्तमतिष्ठास्थानंच वरणानासीमध्यं ततो वरणानासीशब्दाभ्यां निरुच्यतयोस्तन्मध्यस्य च स्पष्टं कथनायपु
नःप्रश्नेभ्रूघ्राणस्य संधिरित्युक्तं भ्रूर्वरणा नासी च घ्राणमिति हि तीयपादांतरे भाष्ये वाचस्पत्यादिषु स्पष्टं एवं चावि
मुक्तव्यवहारादिद मप्यविद्यावच्छिन्नब्रह्मरूपं अन्तापिमृतानां मुक्तिदत्वेन परमात्मास्थितइत्यर्थे लब्धं पुरायोमदी
यमविमुक्तमित्यस्यकल्पितभेदेनमदाधारभूतमविमुक्तमित्यर्थः इंद्रियकर्मादोषारागद्वेषादयः तत्कृतानि पापानिसु
रापानब्रह्महत्यादीनि सर्वाणींद्रियकृतान्यापानि तत्र लिंगव्यत्ययश्छांदसः कचित्पापान्वाशयतितेन नासीति पाठः
घ्राणशब्देन प्राणवायुसंचारक घ्राणमूलमुच्यते द्युलोकतत्परलोकयोः संधिः संधेतिचोच्यते सः एवमेषेतां संध्यां ब्रह्म
विदोभ्रूस्याविमुक्तत्वेनोपासंते ईश्वरो ऽविमुक्तत्वेनध्यातेऽस्मिन्स्थाने उपास्यः योऽविमुक्तेज्ञानमाचष्टे तयोपास
कानामपिवाराणसीतोमृनाम्निवयश्चैवमुपासनाप्रकारंवेदतस्यचेति तत्र भ्रूस्थसेत्रेमुख्योविमुक्तशब्दः तदारो राम
१७

पस्थानात्‌ क्षेत्रयाम्भ्रूमध्यमपि तात्स्थाद्क्षेत्रोप्यविमुक्तः तत्प्रसादलभ्यत्वाज्ज्ञानमप्यविमुक्तं ऽअज्ञानसाधनध्यानेपि
लक्षणयाऽविमुक्तशब्दः यथाभ्रूघ्राणस्य वरणानासीत्वं गौणमेवं तयोः संधावविमुक्तत्वं गौणमस्माश्रुतोभ्रूघ्राण
मावववरणानासिराहितं ननु प्रसिद्धमिति शांकरभाष्योक्तेः यदायोगी संधिमात्रनिष्ठोभवति तदा सर्वदोषपापनाशो भवतीति प्रसिद्धं
सर्वंचभ्रूस्थंक्षेत्रमितरनिरपेक्षमोक्षजनकज्ञानसाधनमितरदुपासनासापेक्षमिति बोध्यं ॥ वरणानासिसंज्ञेयतत्स्थानं सर्वदेहिनां
॥ भ्रुवोर्घ्राणस्य यः संधिस्तस्मिन्नेव प्रतिष्ठितं ॥ मदीयमविमुक्तं तद्धितं नीयं मुमुक्षुभिः ॥ केवलं चिंतनेनास्य सर्वं पापं प्रणश्यतीति
॥ पराशरोपपुराने तथा तत्रैव पुराभिः श्रद्धया पूर्वं पुरायशिवलेनतु ॥ याज्ञवल्क्यमुनिश्रेष्ठ मया पृष्ठं ज्ञानसाधनं ॥ योगीश्वरो
मुनिश्रेष्ठः साक्षाद्विज्ञानसिद्धये ॥ मानुपास्यतयामाह साक्षाद्विज्ञानसिद्धये ॥ अन्ये च योगिनो ध्यात्वे भ्रुवोर्घ्राणमध्यमे ॥ प्रका
शमंत्रलं भ्रुद्धं वरणानासिकाभिधं ॥ केवलं भावनागम्यमुपदिश्य सुलोचने ॥ तन्मध्ये मामकं क्षेत्रमविमुक्तसमाह्वयं ॥ ओं
कारहृदयं सूक्ष्ममुपदिश्य ततः परं ॥ तदग्रे मामनाद्यंतमप्रकं सर्ववस्तुनि ॥ मोक्षसाधनविज्ञानसाधनं चेन केवलं ॥ प्राहुः

Indira Gandhi National
Centre for the Arts

सर्वमुमुक्षूणामुपास्यत्वेनकेवलं:॥ध्रुवोर्घ्राणस्य यः संधिस्तं धियामरनामिके॥ द्युलोकस्य परस्यायं संधिरित्यपि भावयेत् तं संधिसंज्ञं चमा
१८ मेवं संधिभूतमुपासते॰ पूर्वैरपि ब्रह्मविद्भिरप्यतिहितोपस्मृत्येयोदर्शिभिः॥ एवं च कुरुक्षेत्रे शब्दस्य श्रुत्या अविमुक्तक्षेत्रमुक्तिजनकेश
क्तिसिद्धौ मनुवाक्येऽपि नामैकदेशनामग्रहणमिति न्यायेन कुरुपदेन ग्रहणमिति निसिद्धं॥ ननु प्रसिद्धस्य सरस्वतीनदीतीरस्थस्यप
रशुरामकृतपंचह्रदवतः कुरुक्षेत्रस्य ग्रहणं॰ निषेधमुखेन मुक्तिदत्वप्रतिपादनात् वनपर्वणि महाभारतेन तस्य चमुपक्रम्यतेव
संति त्रिविष्टपे स्वर्गलोके महीयत इत्यादिना स्वर्गफलस्यैव श्रवणाच्च॰ वक्तुर्वचनं त्ववांतरक्षेत्राभिप्रायमप्युत्तरत्र करणेमनसाप्य
भिकामस्य कुरुक्षेत्रं युधिष्ठिर॥ पापानि विप्रणश्यंति ब्रह्मलोकं च गच्छति इत्युक्तं॥ तत्र ब्रह्मलोकशब्देन ब्रह्मांडांतर्गतचतुर्मुखलो
करूपः स्वर्गविशेष एव॰ मनसाप्यभिकामस्येत्युपक्रमात् ननु तत्काशीपरं मस्तोनैवतत्रमोक्षस्य श्रुत्या प्रतिपादनात्॰ वनपर्वणि
तदुपक्रम्याग्रे ब्रह्मलोके महीयत इत्युक्तेश्च उपक्रमोपसंहाराभ्यां तस्य कुर्वीरभ्यराजविशेषकृष्टक्षेत्रपरत्वाच्च॰ तत्र कर्षणफलस्य
पुण्यकृतानां स्वर्गप्राप्तिरूपस्य स्मरणाच्च अत्र तत्र एवकौरवपांडवयुद्धेन चापि युद्धेन मृतानां तल्लोकवास उक्तः॥ तत्रात्र हि जंतोः राम
१८

प्राणेषूत्क्रममाणेषु भित्युक्तेर्वरणासिमध्यवर्तिनां मनुष्यव्यतिरिक्तानां स्थावराणां जंगमानां च तस्मां प्राणप्रयाणसमये उन्नतिस्थिति
मलयकारणानां पुण्यपापकर्मणां मध्ये प्रारब्धेन शरीरेणाक्रियमाणयोः पुण्यपापयोरभावात्प्रारब्धकर्मणां भोगादेव परिक्षयात् नवि
द्यमानस्यापि तत्कालेऽनुभवमायपास्वप्रेइवभोगं संपाद्याधिकारिदेहं च संपाद्य सर्वेत: सर्वशक्तिः सर्वांतर्यामी परमकारुणिकः स्वत
ःसिद्धमात्मस्वरूपमविद्यामहाप्यादवगमयति॰ मनुष्येषु पुनः सगुणब्रह्मोपासकाः ये च केवलं फलनिरपेक्षतया श्रुतिस्मृत्युक्तस्व
वर्णाश्रमोचितकर्मानुष्ठातारस्तेषां सर्वेषां चत्वारिंशत्संस्कारैः संस्कृतानामसंस्कृतानां वा पित्रादिभिरात्मगुणैर्युक्तानां प्राणप्रयाण
समये पूर्वोक्तरीत्यैव तत्त्वमवगमयति अन्येषामपि मनुष्याणामुत्कृष्टपापेभ्यो निवृत्तानां गंगावगाहनदेवदर्शनजपदानादिभिः
क्षीणपुराकृतपापकर्मणामवशिष्टकाम्यपुण्यकर्मणामल्पावशिष्टसूक्ष्मपापानां प्राणप्रयाणाव्यवहितपूर्वक्षणे सर्वांतर्यामी
भगवान्स्वापेवताहृशकर्मफलोपभोगयोग्यशरीराणि उत्पाद्यमेषानिष्ठान्स्वस्वमकल्पान्भोगाननुभाव्य उक्तरीत्यैवावगत्य
मवगमयति॰ तदुक्तं स्कंदसंहितायां॰ ईदृशी परमा निष्ठा गुरोः साक्षान्निरीक्षणात्॥ कर्मसाम्येऽप्यनायासात्सान्निध्यस्यैव न संशय

Indira Gandhi National
Centre for the Arts

इति॥ कर्मणः सुकृतदुःकृतयोः फलभोगेन स्वयमाप्येपीत्यर्थः वासिष्ठेपि यथा स्वाप्ने मुहूर्त्ते स्यात्संवत्सरशतभ्रमः॥ तथा मा
१७ याविलासो स्था जायते जाग्रति भ्रम इति॥ एतदभिप्रायेणैवोक्तं कृत्वा कर्माण्यनेकानि शुभानि चेतराणि च॥ नानिस्तणान्म मुक्ति
प्यकाशीसंस्थोऽमृतोभवेदिति॥ लब्ध्वा काश्यां नाभीहशानां मृत देहः शिवस्य प्रतिमांति विश्वेश्वरलिंगवन्नम्यः ऽजन्त्यतिस्त्रा
श्वमेधिके पर्वेणि महत्तसंवर्त्तोपाख्याना त्र्यम्बते॥ तथाहि मरुत्तो राजा बृहस्पतिना याजकेन प्रत्याख्यातश्चिंता विष्टो नारदेनैवं
बोधितः काश्यां मुख्यतवधरन् बृहस्पतिभ्राता संवर्त्तोऽस्ति स त्वां याजयिष्यति॥ समपाकथं परिचेय इति राज प्रश्ने यो विश्वेश्वरदर्शना
र्थी मार्गे शवं दृष्ट्वा तं प्रणम्य संपृच्छ च निवर्त्तते स संवर्त्त इति ज्ञेय इति तत्रोक्तं॥ येन त्वकृष्णपापागंगादि दिदेवेषु यत्ना प्सस्नादंभेनाप्या
सनादकावाकाश्यां महत्सु पापेषु रतास्तेषां तु यातनातेऽवगंतव्यमवगमयति अधर्मिष्ठस्य तस्य तस्ये त्र पातनांते दिशेन्मतिं॥ का
श्यां कृतस्य पापस्य भोगो रुद्रपिशाचता॥ एकैकस्य च पापस्य समा नाम सुतत्र यमिति॥ पाद्मोक्तेः अत्र पातनांतकालिके देहेधि
कारः संपाद्यते तद्देहेपि मुमुक्षुत्वादन्य हि जंतोरिति स्मृत्या न विरोधः जाबालश्रुतावपि पापिनरुपक्रम्य भैरवी घोरां यातनां नानाविधां राम
१७

काश्यां परेता भुक्ता ततः शुद्धा मां प्रपद्यंत इति उक्तं॰ सर्वमुक्ति कामस्य पुण्यवतामपि ततः सुख भोगांते मुक्तिरुक्ता मात्स्ये॰ चंद्रार्द्धमौलिनः सेवे
ललाटाक्षा वृषध्वजाः शिवे मम पुरे देवि मोदंते तत्र मानवाः इति॰ गारुडेपि वाराणस्यास्थितो यो वै पातके षु रतः सदा॥ योनिं प्रविश्य पैशा
चीं वर्षाणामयुतत्रयं॥ पुनरेव च तत्रैव ज्ञानमुत्पद्यते ततः मोक्षं गमिष्यते सोपि मत्प्रसादान्न संशयः॥ वनगाधिपे तितथा ब्रह्मवैवर्त्तेशिवशर्मो
पाख्यानेन पातनांते मुक्तिरिति स्पष्टमेवोक्तं॰ मन्नामममभक्तश्चमपि सर्वार्पितक्रियः॥ यथा मोक्षमिहाप्नोति न तथान्यत्र कु
त्रचिदिति॥ मात्स्येनेदृशस्ये वसंधो मोक्षप्रतिपादनाद्यत स्मादुक्तश्रुतौ जंतुपदं मनुष्यविषयेई दृशमनुष्यपरमेव॰ जंतुपदं स
कलस्थावरमनुष्येतरसकलजंगमसंग्रहाय चेति तत्त्वे॰ एतत्सर्वमग्रे पाद्मे लेखनेस्पष्टं यस्मात्तु पापिनोनेकजन्मारंभककर्मणा
रब्धो देहस्तस्य काश्यां मृतस्यापि काश्यामेव तावज्जन्मप्राप्त्या शेषे मुक्तिर्भवतित्यतः एवकस्यचिच्छुध्यकस्य काश्यां मोक्षारंभवासं
निधौ मृतस्यापि जन्मानंतरं मुक्तिरुक्ता शिवपुराणे पाद्मे च काशीकृतपापस्य तत्रैव मृतस्य कस्यचिद्दशजन्मानि त्र्यंबके कांचनमा
लिनी द्विजमाधवस्नानजपुण्येन देवजन्मच श्रूयते॰ यस्तु काशीकृतपापोऽन्यत्र मृतः स विविधयमपातनानंतरं भैरवकृतां रुद्रपि

Indira Gandhi National
Centre for the Arts

शाचतामनुमयकाश्यां देहग्रहणपूर्वकं मुच्यतइति काशीखंडे यत्तु अशनं वसनं वासः काश्यां येषाम मार्गितः कीकटेन समा का
शीगंगा पंगारवा हिनीतितन्नतेषां सद्यो मुक्तभावपरं काशीविषयपुराणानामर्थवादत्वमाशंक्यनीलसार्थवादत्वमात्मतत्वविनिर्ण
२० येऽप्यनेन निराकृतं ब्रह्मवैवर्ते यस्तु देशांतरस्थः कृतमहापातकोपि काश्यामागत्य म्रियते तस्य सद्यो मुक्तिरेव ब्रह्महा अभि
गच्छेत्तु अविमुक्ते महावने तस्य क्षेत्रस्य माहात्म्यात् ब्रह्महत्या निवर्तते नकेवलं ब्रह्महत्या प्राकृतं च निवर्तते प्राप्य विश्वेश्वरं देवं
न स भूयोभिजायते इत्यादि माहात्म्यात् जन्मांतरसहस्रेषु यत्पापं पूर्वसंचितं अविमुक्तं प्रविष्टस्य सर्वं व्रजति वै क्षयमिति लैंगाच्च
बुद्धिपूर्वमविमुक्ते पापात्यागिनामपि मोक्ष एव भवति अग्निप्रवेशं ये कुर्युरविमुक्ते विधानतः प्रविशंति मुखे ते मे निःसंदिग्ध
वरानन इत्यादि माहात्म्यात् एवमनशनेनापीत्यपि तत्र ब्राह्मे अविमुक्ते म्रियेयस्तु मत्यो रत्यातभिषक्क्रियः ।। कार्यपापाणभूत
स्तु जाह्नवीजलमध्यगः ।। अविमुक्तो मुखस्तस्य कर्णमूलगतो हरः ।। प्रणवं तारकं ब्रूते इत्युक्ते अत्र तन्त्रवेध प्राणत्यागिनां सद्यो
मोक्षः अवैधेन तथा कुर्वतां किंचिद्विलंब इति बोध्यं इयमाधिभौतिकी वाराणसी विराजो ब्रह्मणः सकलतनभूलोकजीवस राम
२०

महे भुवोर्मध्ये स्थिता अपि जीवानां मरणे कं भुवोर्मध्ये अध्यात्मभूता केवलोपदेशगम्या एतन्न देवानस्थानं एतद्धि देवमपि
तत देवलोके ऊर्ध्वं तेषाधिभौतिकी मुख्या अध्यात्मेतत्साध्येयतत्वे स श्रवणात् स्मरणाच्च ।। कुरुक्षेत्रं प्रयागं सिद्धं भूम्यां पापनि
वर्तकं ।। तदाश्रय फलं चापि लभते ऽस्मिन् वसेवया ।। देवानां देवयजनं प्रसिद्धं यन्महेश्वरि ।। सर्वेषामपि भूतानां तद्ब्रह्मसदनं प
रमिति ।। पराशरोपपुराणाच्च अन्यच्च पापसंघातनिवर्तकं तथैव च ।। प्रसिद्धं सर्वलोकेषु स्थानं तीर्थं च यन्त्रिपो ।। इदमे
व हितत्त्वं मम विमुक्तये दृश्ययं ।। अस्मिन्वसेवयातानिसे वितानि भवंति वेइत्यपि तत्रैवोक्तं ।। तीर्थार्थीन बहिर्गच्छेन्नरो वार्थीक्त
दाचन ।। सर्वतीर्थानि देवाश्च वसंत्यत्राविमुक्तके ।। तया सर्वाणि तीर्थानि समपुर्यश्च मानदे ।। वसंति काशीमाश्रित्य स्वसाम
र्थ्यविवृद्धये इति ।। ब्रह्मवैवर्ते स्कांदे ।। श्रीशैल हिमशैलाद्यायस्या न्यायतनानि च ।। तपांसि नानारूपाणि संन्यासः सर्वकर्म
णां ।। विष्णोराराधनं श्रेष्ठं मुक्तये ऽभिहितं किल ।। पुर्यश्चापि समाख्याता मृतजंतुविमुक्तिदाः ।। एतानि यानि प्रोक्तानि का
शी प्राप्तिकराणि हि ।। काशीप्राप्य भवेन्मुक्तो जंतुर्नान्यत्र कुत्रचिदिति ।। एतेन सर्वपुण्यजनकसमष्टित्वं काश्या उक्तं अयस्फुटं

Indira Gandhi National
Centre for the Arts

काशीमाहात्म्यबोधकपद्मपुराणस्य पंचाध्यायीसारो लिख्यते तत्र हि काशीमुपक्रम्य प्रभावः श्रूयतामस्य नित्यानंदस्वरूपिणः ॥ अत्र
त्यक्तासवः संतः सच्चिदानंदरूपतां ॥ यथायोगं लभंते हि नात्र कार्या विचारणा ॥ अत्र प्रविष्टमात्रस्य जंतोः पापं पुरार्जितं ॥ विना
२१ शमाप्नोति परं पुण्यराशिश्च वर्धते ॥ निर्वाणपदमेवेतदधितिष्ठामि नित्यशः ॥ म्रियमाणस्य जंतोश्च वाक्यं कर्णे समुच्चरन् ॥ वाक्यं
तत्त्वमसीति त्वमोमसीति वा शुद्धः शुद्धे देहे तु श्रीरामस्त्वमसीति ॥ विना वाक्योपदेशेन ब्रह्मात्मैक्यं न भासते ॥ ब्रह्मात्मैकत्वविज्ञाना
दृते मुक्तिर्न जायते ॥ नियमेनेह कथयेतदहं यस्य कस्यचित् ॥ स्वस्वकर्माणि निःसर्गात्तानुत्तमानथ मध्यमान् ॥ अधमानपि मा
र्गैस्यान्नयामीह परांगतिं ॥ पंडितो वाथ मूर्खो वा मुखजो वांत्यजः ॥ अस्मिल्लिंगे त्यजत्प्राणान् धर्मकृन्न मुक्तिमाप्नु
यात् ॥ अनेन मरणकाल एव तत्त्वज्ञानं पापेभ्यो निवृत्तस्य धर्मिष्ठस्यैवेति बोधितं पापकृन्म्रियते काश्यां यदि मा कृपुण्ययोगरवा
त् ॥ न जातु नरकं याति का कथ्या धर्मतत्परे ॥ पापकृत् काशीभिन्नदेशे ॥ भूमौ जलेंऽतरिक्षे वा यत्र क्वापि मृतो द्विजः ब्रह्मात्मैक
त्वमाप्नोति काशीशक्तिरूपाहिता आप्नोति जनाति काशीति वर्णद्वितयं स्मरं स्त्यजति पुद्गलं यत्र क्वापि भवेत्तस्य कैलासे वस राम
२१

तिः सततः ततः पुनः स पुण्यात्मा काश्यां मुक्तिमवाप्स्यति अथ मिश्रस्तत्क्षेत्रे पातनां तेदिशन्मतिं काश्यां कृतस्य पापस्य भोगो रुद्रपिशाच
ता । एकैकस्य च पापस्य समानामयुतत्रयं पुरुषस्य यावंति पापानि तेषां एकैकस्य समानामयुतत्रयमित्यर्थः एतदग्रे स्फुटी भविष्यति रु
द्रः पुण्यपापानां धाम्ना वाराणसी पुरीति तत्रार्जितानां तेषां जन्मांतरानारंकत्वपरं यत्वेत हलान्मार्कं तेपहष्टमायावदस्तत्क्ष्णका
लेनैव कोटिकल्पभोग्ययातनानुभवः ननु क्रांत्यनंतरं प्राणे ब्रह्मरमाणे क्षितिवर्तमानकालक्षतिविरोधादिति तन्न ईदृशोरूपदह
पोस्तत्र जंतुपदस्य काश्यर्जितपापहीनजंतुपरत्वात् अन्यदेशार्जितपापानां वाराणसी दर्शनेनैव निहतेः पुण्यफलस्य सापु
ण्यादेरुत्क्रांत्यनंतरं प्राप्तिवत् उत्कटपापफलस्यापि प्राप्तौ बाधकाभावात् तस्मात्पापं न कर्तव्यं मनागपि विधाः पुरे काश्यां या
निजधर्मेण मुमुक्षुस्तिष्ठति द्विजः अनायासादिलं वाप्यां समो संलभते ध्रुवं ये काश्यां संशया विष्टमुक्तो तेषां शरीरिणां प्रा
णत्याणसमये प्रमार्ण परमेश्वरं ः तत्र स्वल्पं कृतं जंतुं तं जंतोद्विजोत्तमाः भूयादनंतफलदं तत्क्षेत्रस्य प्रभावतः आनंद
काननं तद्धि शंकरस्यातिवल्लभं न विमुंचति विश्वात्मा अविमुक्तं ततः स्मृतं द्विजं स्वधर्मनिरतं यो वर्षाशत्रदानतः स्यापयच्छू

Indira Gandhi National
Centre for the Arts

यापुक्तस्तस्यपुण्यफलंश्टणुयावंत्यः सिकताः संतिगंगायांमुनिसत्तमतावद्वर्षसहस्राणिक्रीडेद्दिव्येणसंगतः पश्चात्तत्रमहाराजो
२२ जायतेनिर्मलेकुले· अंतेचलभतेकाशींततोनिर्वाणमाप्नुयात् अश्वत्थंपिचुमंदंवासहकारमथोततः योरोपयतियत्नेनतस्यापे
तत्फलंभवेत् वाराणस्यांमृतः पापोनोपैतियमयातनां· नियंताभैरवस्तस्यकालकाल ;कपालभृत्· आसीत्क्रमेलकोनाम्नाशूद्रः
काशीपुरेतुराधर्मात्माद्विजभक्तश्चदयावाननसूयकः कालक्रमेणतत्रैकोविप्रोवेदविचक्षणः भागुरिःसमुपागच्छन्निवासा
यविभो ;सुरेशतुक्रमेलकगृहंजगामसुबुभुक्षितः तस्यद्वारिसमासीनोयाचतेस्मविनीतवत् क्रमेलकश्चतंदृष्ट्वापूर्वपापनियं
त्रितः भर्त्सयामाससततंताडयामासपाणिना अथकालेनमहताव्याधिग्रस्तोबभूवसः तत्याजासून्शिवक्षेत्रेमणिकर्णीज
लाश्रितः ततःसभैरवगणैर्यातनासुनियोजितः क्रमेलकस्तृषाक्षुधार्तोवर्षसप्तकं·तावत्कालंशीतदुःखैर्भुजेदुःसमुक्त
दंततोनिर्जलनिर्मसेकृमिदेहधरोभवत्· तत्रैवसारमेयोभूत्वलमांसः सुदुःखितः त्रिंशत्त्रिशत्समाः पश्चात्तावत्कालंगजो
ऽभवत् ततःसंकीर्णयोनौनिशरीराण्यधारयत्· अथस्वदृशरीरंसदग्धेतत्रक्रमेलकः ततोभैरवदूतैस्तैः सनीतोभैरवाग्रतः का राम
२२

लभैरवदृष्ट्यैवकृद्रपैशाच्यमाप्तवान् त्रिंशद्वर्षसहस्राणिक्षुत्तृषाभ्यांविशोषितः ततोऽनुक्षीणकलुषंशंकरस्तारकंवचः श्रावया
मासविधिवत्संपाद्याधिकृतिपरां अत्रब्राह्मणावमाननरूपकपापंतावद्दुर्द्धपिशाचतोऽस्मात्प्रतिपापंतावन्नावस्तेतिगम्यते· यद्य
सापंकाशिकायामवाप्तस्थूलोऽल्पएंजानतोऽजानतावातत्भ्रोगप्रापणायैवदेहाश्चयोनिजाभैरवेघ्याविधाना ;उच्चावचा
यातनेनेकमधानाविद्यंतेतिकाशीकृताघः यथायाम्येहिनरकेपातनादुःखभागिनां अयोनिजाहिदेहास्तुसतद्देवावधार्यतां
· गंगाद्वितीयस्नाने अलिंगानांचसमर्चने: विनाशमाप्नोतिपुनर्यदज्ञानादुपार्जितं· स्वल्पंज्ञानादपिकृतंविश्वेशस्यसमर्च
नात् नरस्यसेवनसैदेहाभूयस्तदनुमार्जनात् उपपातकसंपत्तिर्महापातकसंगमः कालभैरवनिर्दिष्टयातनामानुयात्नरं· स्थू
लंयोदुरितंकाश्यांकृत्वाऽन्यत्रमृतोभवेत् सकल्पकोटिभिस्तस्यपापस्यांतंनगच्छति· अविमुक्तेतुयस्तिष्टेद्राकलेवरपात
नात् तंविश्वेशोऽत्रजीवंतंमृतंचपरिरक्षति· क्षेत्रेपवित्रेमृतिमागतंमांब्रह्मादिकीटांतशरीरभाजांकर्णेजपत्यस्तरंतारका
रव्यवाक्यंततोध्वस्तभवाभवंतिलमोमसीत्येववाक्यमथवन्मगवानीशोभवान्यासहितोऽनिशं· अधितिष्ठतिजंतूनांमुक्त्यै

Indira Gandhi National
Centre for the Arts

क्षेत्रमिदं परं वाराणसीस्थतीर्थानामवगाहनतः परं त्वंतःकरणसंशुद्धिं प्राप्नुयाद्धि जितेन्द्रियः तीर्थान्तराणि क्षेत्राणि वि

२३ स्मुभक्तिश्च नारदश्रंतः कारणसंशुद्धिं जनयंति न संशयः वाराणस्यपि देवर्षे ताहश्येव परं तु साम काशपतिब्रह्मैक्यताकारक

मोपदेशजः अनेनैव विशेषेण तां प्रशंसंति तात्विकाः सा सा द्वाराणसी मुक्तेर्विघ्नोभंक्तिस्तथाविधा तयापि विस्मुभक्तिक

ह्निर्त्रैरेव विभाव्यते काशी तु तिर्यग्भूतानामपि साधारणी मता काश्यां कृतेन पापेन यातनामतिभीषणां प्राप्य पश्चाद्धि मुच्य

न्ते सर्वे यातक्षीणकल्मषाः वाराणस्यां कृतं कर्म नीलकंठाय चार्पितं मनः शुद्धिविधायास्तु तत्त्वज्ञानाय कल्पते यत्कर्म काश्यां कु

र्वीत सुभवाय दिवा ऽशुभं अस्य यंतत्र भवति नात्र कार्या विचारणा धर्मिष्ठस्यात्र देहस्य शरीरत्यागमात्रगतः अपवर्गो भवेत्पंच

नदस्यस्य विलंवनः एतत्कृतान्यसंघातो घोरां भुक्त्वा तु यातनां पैशाच्यं समवाप्नोति वर्षाणामयुतत्रयं अतिपापमिति शेषः विज्ञा

यकाममयं च दंभमात्सर्यमेव च त्यक्त्वा तिप्रहरहन्त शांतिदांतिसमन्वितः अकुर्वन्नकलुषं कर्म समलोष्टाश्मकांचनः पंचा

क्षरपरो नित्यं निषेवेत विभोः पुरीं एही चेह्रमनिरतो वहिरर्जितवित्तभुक्व्यवहारोपयोग्यत्र गत्वा विमलं वसुप्रियाति राम

२२

थि सीदये परो निषेवेत विभोः पुरीं स्वस्वज्ञात्यनुसारेण यो धर्मो ऽस्य प्रकल्पितः तत्तद्धर्मरतैरेव सेव्या वाराणसी पुरी अन्यैः संसेव्य

मानासा कीकटान्नातिरिच्यते कीकटत्वं च मुक्तो विलंवात्तु अत्रानुत्रापि अशनं वसनं वासः काश्यां येषाममार्गतः कीकटे

न समा काशी गंगाप्यंगारवाहिनी तिमध्यमेश्वरमारभ्य पावदेहलि विघ्नपंसत्रं संस्थाप्यतद्धि सुभ्रामयेन्मंज्लाकृति

तत्रपा जायते रेखा तन्मध्ये क्षेत्रमुत्तमं काशीतिपद्धिर्दे वास्तत्र मुक्तिः प्रतिष्ठिता काश्यां तु परं क्षेत्रं विशेषफलसाध

नं वाराणसीति यत्ख्यातं तन्मानं निगदामि वः दक्षिणोत्तरयोर्नद्योर्वरणा ऽसिश्च पूर्वतः जाह्नवी पश्चिमे चापि पाशपा

णिर्गणेश्वरः २ तस्मान्तं तः स्थितं दिव्यं विशेषफलसाधनं अविमुक्तमिति ख्यातं तन्मानं च ब्रवीमि वः विश्वेश्वरात्तु

दिक्षु धनुः शतपुंगीन्मितं अविमुक्तमिति क्षेत्रं मुक्तिस्तत्र न संशयः ३ गोकर्णेशः पश्चिमे पूर्वतश्च गंगा मध्यमुत्तरे भार

भूतः वेद्धेशानो दक्षिणे संप्रदिष्टस्तत्तु मोक्षभवनं विश्वभर्तुः चतुर्विधेपि क्षेत्रे ऽस्मिन् प्रमीतो गर्भयातनां नैवाप्नोति

मनः श्रेष्ठविशेषोयं परः स्मृतः काश्यां मृतस्तु सालोक्यं सामीप्यमाप्नोति सत्तम वाराणस्यां मृतो जंतुः सायुज्यं सारूप्यम

Indira Gandhi National Centre for the Arts

स्तुतेष्वविमुक्तेविपन्नस्तस्यास्तांनिध्यमानुयात्ततश्चिदानंदमयेब्रह्मण्येवविलीयते॰ततः तदंतर्गतेतद्गृहे॰सलोकतां
सरूपतांसांनिध्यंचापिसत्तमाः कल्पकालमवाप्नोतिततोब्रह्मात्मकोभवेत्॰ चतुर्धाविततेक्षेत्रेसर्वत्रभगवान्शिवः मा
२४ चष्टेतारकंवाक्यंब्रह्मैक्यमतिबोधकं॰तथापितत्तत्स्थानमाहात्म्यात्तत्रतत्रमुक्तसाहिभोगपूर्वापवर्गमितिजीवन्मुक्तिदशोवसः॰कि
मत्रचित्रंविप्रेंद्राः काश्यांमुक्तिंसमागमेभागीरथीविमिश्रायांतीर्थसामर्थ्यसंपदि॰केवलाजान्हवीविप्राज्ञाताज्ञाताथवा
पुनः अपवर्गंवितरतिस्वतोपिन्यक्तदेहिनः यस्यकस्यापिवाजंतोर्भागीरथ्यांगतायुषः नदुर्लभोब्रह्मभावस्तत्संगस्यपितां
हसः चिदानंदमयंब्रह्मगंगाभावमुपागतं ब्रवीमिसत्यमेवेतन्नात्रवःसंशयोभवेत्॰ इयंसोमोद्भवापुण्यापासरितोन्या
श्चयामुविता सर्वाजान्हवीनीरव्याप्तमुत्तरवपाविका : सर्वंममावानिर्वाणंतोयराशिवहानदीभागीरथ्यानिविलमस्तोत्र
शंभोर्विमुक्तिदे एकैकमपिविप्रेंद्राः साक्षात्ब्रह्माप्तिसाधनं॰ नचित्रमत्रहितयंयन्निर्वाणायकल्पते इदृशीस्वनेदीप
त्रसर्वतीर्थमयीशुभातांकाशींकोनसेवेतभीमसंसारमुक्तये॥इतिपाद्मकाशीमहात्म्यसारः ननुहरिवंशेकाशीमुपक्र राम
२४

म्याकस्माच्चपुरीसातुविद्गुतासर्वतोदिशं तस्यांपुर्यांततोदेवोनिर्ममेपरमात्मनः परंपार्वतीवासयोग्यमंतः पुरं॰रमतेतत्रवैदे
वोरममायोगिरेः सुतांनरतिंतत्रवैदेवीलभतेगृहविस्मयात्कलौपापिनामपिमुक्तिदानेनाविवेककृतविस्मयादित्यर्थः
वसाम्यत्रनपुर्यांतुदेवीदेवमथाब्रवीत्॰ देवउवाच॰नाहंवेश्मनिवत्स्यामिक्षेत्रेविमुक्तंहिमेगृहं॰वेश्मनिवत्स्यितद्गृहे.
॰नाहंतत्रगमिष्यामिगच्छदेविगृहंप्रतिपितृगृहंप्रतीत्यर्थः हसन्नुवाचभगवान्त्र्यंबकस्त्रिपुरांतकः तस्मात्तदविमुक्तं
हिप्रोक्तंदेवेनैवस्वयं॰यस्मिन्वसतिवैदेवः सर्वदेवनमस्कृतः युगेषुत्रिषुधर्मात्मासहदेव्यामहेश्वरः अंतर्धानंकलौ
यातितत्पुरंहिमहात्मनः अंतर्हितेपुरेतस्मिन्पुरीतुवसतेपुनरितिसंदर्भेणकलौकाश्यामंतर्धानोक्तेः कांतस्यांमुक्तिकथ
तिचेन्न तत्पुरशब्देननिर्ममेपरमात्मनइत्युक्तेपरदस्येवाभिधानेनकाश्यामंतर्धानकथायाःएवाभावात् हहाकलि
युगंघोरंहाहाभूतमचेतनंयेविमुक्तंनमुंचंतिकृतार्थास्तेनराभुवीतिमात्स्योक्तेः कालोविश्वेश्वरोदेवः कलौवाराण
सीपुरी॥कलौभागीरथीगंगादानंकलियुगेमहदिति ब्रह्मवैवर्तोक्तेश्च एवमाख्यानेस्वैवोचितमाद्य स्मशानसंस्थितं

Indira Gandhi National
Centre for the Arts

वेश्मादिव्यमंतर्हितं चयत् भूर्लोके नैव संयुक्तमंतरिक्षे शिवालयं अयुक्तास्तन्न पश्यंति युक्ताः पश्यंति चेतसेति मात्स्योक्तेश्च श्मशानं का
२५ शी. तत्राभ्युत्थितं वेश्मोक्तं पदं तत्संगत धीर्भे नन्वकाश्यादि तिस्मृतिः इतीतेः भवान्मात्मयोगेन तद्धि निर्मितपुरस्सांन्नधीनो चित्सा ब्र
यत्नुक्ता लिकापुराणे वाराणसी नामपुरी गंगातीरे मनोहरे. चरणायास्तथैवासे मिश्चेचापाकृतिः सदास्वयंवृषध्वजस्तत्र नित्यं वसति यो
गिनां दयाप्रीतिकरो योगी स्वयं चाप्यात्मचिंतकः विपन्नस्यामापुरीनित्यं तेन योगबलाद्धृतादि ध्यं ज्ञानं दृष्ट्वा देव तत्र योम्रियते जनः तस्मै
स्वयं महादेवः संसारग्रंथिमुक्तये. स भूत्वा परमो योगी भूतस्तत्र भवांतरे. यन्न तेनैव निर्वाणमाप्नोति हरशासनात्. योगयुक्तो महा
देवः पार्वत्या रहितः सदा देवगंधर्वयक्षा पांमानु[illegible]नित्य[illegible]तेपोहरः अकाशगृह्व्ये तत्र तस्य प्रकाशितं नन्त्र कामदो देवो नाथ वि
रास्तं प्रसीदति आराधितः शिवस्तत्र निर्वाणपद प्रसीदति गे[illegible]वि वर्जिता सा तु पुरी न त्र न गच्छति. योगास्थानं महाक्षेत्रं कदाचि
दपि शांकरी सुक्तं तत्रापि कलावितिशेषः हरिवंशे[illegible]पतनुः आदित्यपुराणे गच्छ वाराणसीं व्यास यत्र विश्वेश्वरः शि
वः न तत्र युगधर्मोऽस्ति नैव लग्ना वसुंधरा विश्वेश्वरस्य यल्लिंगं ज्योतिर्लिंगं तदुच्यते यस्मिन्दृष्टे क्षणाज्जंतुः संसारं न पुनर्विशेत् राम
२५

इतितदपि शिवनिर्मितस्वपदाभिप्रायं यत्र पदं तवेन्निनिपुरे युगधर्मः पुण्यपापकृतो मोक्षप्रति बंधो नास्तीत्यर्थः यत्त्वेकाम्रव
नमाहात्म्ये कलावंतर्हिता काशी मुक्तिरत्रैव लभ्यत इति तत्रापि काशीपदं तदं तद्वार्ज्ञे शिवनिर्मितपदपरं यद्यपीत्यादि तथापि
अत्रैव काश्यामेव मुक्तिरित्यर्थः यद्धा तत्रान्यत्र क्षेत्रस्कतिपरं मोक्षस्योपाधिभेदादनेकजीवभावं प्राप्तस्य चेतनस्योपाधिवि
गमेन स्वस्वरूपेऽवस्थानं। चेतनश्चैक एव विभेदजनके ज्ञाने नाशमात्यंतिकं गते आत्मनो ब्रह्मणोऽभेदमसंतं कः करिष्यती
ति विष्णुपुराणोक्तेः सर्वस्याधारमचिंत्यरूपमणोरणीयांसमतिप्रमाणं सितासितं चेश्वमीश्वराणामाराधयिष्येत पसैव विष्णु
मिति मच्छदकांतरे तत्रैवोक्तेश्चासितं बहुजीवरूपेणासितमबहुमीश्वररूपेणेत्यर्थः बहवः पुरुषा लोके सांख्ययोगविचारणे
समासतस्तु वे व्यासः पुरुषैकत्वमुक्तवानिति मोक्षधर्मे भारतोक्तेश्च. तत्रैवाऽऽत्मा च परमात्मा च नमस्ते नलिनेक्षण विदितोऽ
सि हृषीकेश नारदाहे वक्तां तथेति कृष्णं प्रत्यर्जुनोक्तेश्च. गीतायामपि अहमात्मा गुडाकेश सर्वभूताशयस्थितः अहमादिश्च म
ध्यं च भूतानामंत एव च. न तदस्ति विना यत्स्यान्मया भूतं चराचरं. विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगदिति. स एव शि

Indira Gandhi National
Centre for the Arts

क्नारायणादिपदाभिधेयः ब्रह्मोपनिषदि तुरीयम् ब्रह्म मात्रिर्योवियुच्यतिश्रुतेः कौर्मे उत्तरभागे ब्रह्मादिशक्तिकथने तत्रमात्मा परं
२६ स्तास्त्र्यगवान्परमात्मा सनातनः गोपतेसर्वशक्त्यात्मा शक्तिपाणिर्महेश्वरः एतमेके वदंत्यग्निं नारायणमथापरे इत्युक्तेः
तीर्थेषु केषु द्रष्टव्यास्तोतव्यो केच्य नामभिरिति संतीपतिर्द्रष्टव्यः सर्वदा सर्वभूतेषु द्रष्टव्यः सर्वतो मुवि मर्द्दलोकेषु यः किं चैव
स्तितच्च मया विना वाराणस्यां विशालाक्षी प्रयागे ललिताभतथेत्युपक्रम्य रुक्मिणी द्वारवत्यां तु राधा वृंदावने वने ॥ आत्मा
केश्य ताह राज्ञां नं चेश्वरार्पण वुध्या कृते ः कर्मभिः श्रियेत रुध्यात्म्य त्रापि भवतिईश्वरे कर्मसमर्पणं च कामतो ऽकामतो वापि
त्करोमि मुभाशुभं तत्सर्वं त्वयि सत्यस्तं त्वत्प्रयुक्तः करोम्यहं ऽ मितिचिंतनं नाहं कर्तासर्वमेतत्ब्रह्मैव कुरुते न तथा एतद्ब्रह्मार्पणं
प्रोक्तमृषिभिस्तत्त्वदर्शिभिरिति कौर्मोक्त भगवद्गीतायामपि यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबंधनः तदर्थं कर्म कौंतेय
मुक्तसंगः समाचर यज्ञो विष्णुः । संगः । कर्तृत्वाभिमानः तदर्थं त्वं च कर्मणां तत्प्रेरणया कर्मकरणात् तस्मादसक्तः सततं
तं कार्यं कर्म समाचर असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः । असक्तः । फलकामानाकर्तृत्वाभिमानरहितः कामिमत्रा का राम

पि मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः अध्यात्मचेतसा अहमंतर्यामि भगवद्धी
नस्तस्मात्परेणाज्ञे भृत्य इव कर्माणि करोमीति वुध्या ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः लिप्यते न स पापेन पद्मपत्रमिवां
भसेति तथा यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानवः अर्चा च तस्मात्त्वमेरितत्ववुध्या
कर्मकरणं तथा मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे इति सर्वकर्मकरणा वेला
यां मन्मनाः । भगवत्प्रेरणया करोमीति वुद्धिमान् । अत एव मद्भक्तो भृत्य इवाज्ञो मदाज्ञापालकोऽतएवैतेः कर्मभिर्मद्या
जी मत्पूजको मां नमस्कुरु अकृतदुष्कृतजदोषपरिहाराय तदेवाह । सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज अहं त्वा सर्वपापे
भ्यो मोक्षयिष्यामि मा शुच इति परित्यागः । स्वस्य कर्तृत्वाभिमानत्यागात् शरणत्वं मत्प्रेरणया प्रवर्तमानत्वात् एवं सर्वकर्म
फलानामीश्वरो भोक्तेति चिंतनं कर्मफलसंन्यासः ईश्वरेण नियुक्ता हि साध्वसाधु च भारत कुर्वंति पुरुषाः कर्मफलमीश्वरा
मितत । न चेत्तदिष्टं कौंतेय यदन्येन कृतं फलं । मा भूयादिति तस्मात्त्वापीश्वरे तन्निवेशयेत्तिराज धर्मोक्तेः । यदन्येन कृतं कर्म तस्य

Indira Gandhi National
Centre for the Arts

फलमन्यः प्राप्नुयादिति यत्तन्नेष्टमित्यर्थः । मधुहृत्कान्तरे । नहि कश्चित्स्वयं मर्त्यः स्ववशः कुरुते क्रियाः । ईश्वरेणानियुक्तोऽयं सा

२० ध्वसाधु वा पांडव । करोति पुरुषः कर्म तत्र का परिदेवनेति युधिष्ठिरं प्रति व्यासवाक्यं । ईश्वरस्य तत्फलभोक्तृत्वं च जीवैः कर्मा

णि कारयतस्तस्य प्रीतिरेव यथाऽर्थिभ्यो धनानि यच्छन्नू दाता तद्धनभोक्तेमत्तं पत्र्यवितेन ॥ इति काशीमुक्तिनिर्णयः ॥ गयायां

श्राद्धेन तु स्वमुक्तेः पितृश्राद्धे नरकोद्धार सर्वपापनाशस्वर्गब्रह्मलोकप्राप्त्यादि यथायथं फलं । मुक्तेऽपि पितृश्राद्धे मत्स्या वा पाभावः ब

ह्महत्यादिपापनाशः सत्यां कामनायां पुत्रादि च फलं स्वर्गगतं फलं । तत्र पितृश्राद्धोद्धारार्थं कृते नैव गयाश्राद्धेऽसत्यां कामनायां पुत्रा

द्यपि फलमित्येके । फलद्वयार्थं प्रयोगद्वयमित्यन्ये । गयाश्राद्धं पुत्रस्य नित्यं । गयाभिगमनं कर्तुं यः शक्तो नाभिगच्छति । शोचंति पित

रस्तं वै वृथा तस्य परिश्रम इति कौर्मे निंदाश्रवणात् । तत्र सकृत्करणमेव नित्यं । पुनः करणं तु फलाधिक्यं । न त्वावश्यकता । तत्रापि

येषां प्रथमयात्रायां प्रेतत्वनिवृत्यर्थं प्रेतशिलायां पिंडदानं भाण्डस्फोटनं च कृतं तेषां द्वितीयादियात्रासु न कार्यं । कांक्षंति पि

तरः पुत्रान्नरकाद्भयभीरवः । गयां यास्यति यः कश्चित्सोऽस्मान्संतारयिष्यतीति ब्रह्मस्मृतिः । कृत्स्नमुक्ताबुभौ पक्षौ गयायां पोक्से गम २०

न्नृप । पुनात्यासप्तमं चैव कुलं नास्त्यत्र संशयः । अनेन मासं वास उक्तः । एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् । यजेत वाश्वमेधेन नी

लं वा वृषमुत्सृजेत् । ब्रह्मज्ञानं गयाश्राद्धं गोग्रहे मरणं तथा । वासः पुंसां कुरुक्षेत्रे मुक्तिरेषा चतुर्विधेति वायवीये । कुरुक्षेत्रमत्र

काशी । पितृतीर्थं गयानाम सर्वतीर्थाधिकं मतं । अत्र नरकभोगफलकं प्रारब्धमपि कर्म गयाश्राद्धेन नाश्यत इति वचनबलादिति के

चित् । मुंडपृष्ठाच्च पूर्वस्मिन् दक्षिणे पश्चिमोत्तरे । सार्धक्रोशद्वयं मानं गयेति परिकीर्तितं । पंचक्रोशं गयाक्षेत्रं क्रोशमेकं गया

शिरः इति वायुपुराणे । गयाश्राद्धविधानार्थं मुक्तये यः कीकटं व्रजेत् । पापीयाञ्जायते सद्यो मृतश्चेदुद्भवो भवेत् । ह सार्थे गम

ने दोषस्तीर्थार्थे न दुष्यति न जातु देशदोषास्तितीर्थक्षेत्रे च देवतेति वायुपुराणे । उद्यतस्तु गयां गंतुं श्राद्धं कृत्वा विधान

तः । विधाय कार्पटीवेषं ग्रामस्यापि प्रदक्षिणं ततो ग्रामान्तरं गत्वा श्राद्धशेषस्य भोजनं । कृत्वा प्रतिदिनं गच्छेत्प्रति

ग्रहविवर्जित इति । श्राद्धमत्र घृतप्रधानद्रव्यकं श्राद्धं । गयाश्राद्धवदखिलदेवताकमेतत् । षड्दैवत्यं वा । गयायां पक्ष

त्रयवासः क्वचिदुक्तः । क्वचिन्मासवासः । आमरणं वासोऽतिप्रशस्तः । ब्रह्मज्ञानाद्या मुक्तिस्तथात्र मरणाद्भ

Indira Gandhi National
Centre for the Arts

वेदित्युक्तेः सालोक्यमत्रबोध्यं तत्र पुत्रादयोऽधिकारिणो मित्रपर्यंताः। पुत्राननुज्ञादीनां पिंडदानेपि अप्रजादीनामत्राधि
२८ काराः। सवर्णज्ञातिमित्रबांधवसुहृदां चाधिकारः। परेस्तु दंडस्पर्शनमात्रे पितृस्मरणपूर्वकमधिकारः। जीवत्पितृकस्तु
प्रसंगतो गयां गत्वा मातृपार्वणं कुर्यात्। तदुद्देशेन तु गमनं न तस्य योपदनुग्राहो सोपि तच्छ्राद्धं गयायां कुर्यात्। मृत्यज्ञापि
कयोरप्यधिकारः। महालयेगयाश्राद्धे मृतश्राद्धे दशाहिके पिंडशब्दप्रयोगः सादन्नमन्यत्र कीर्तयेत्। वृद्धिश्राद्धेपीतिश्रा
द्धसपिंडीकरणेषु नाभिश्रवणजपः। पिंडद्रव्याणि पायसचरुसक्तुवसकुतं तुलपिष्टतंडुलमूलफलादिना। पूर्वाभावे तूत्तरं।
पिण्याकतिलगुडादिना वा। तिलाज्यमधुदध्यादि पिंडद्रव्येषु योजयेत्। पिंडप्रमाणमामलकं शमीपत्रं वा सर्व
थाऽशक्तो शमीपत्रप्रमाणं गयायामधिमासे जन्मदिने अस्ते च गुरुशुक्रयोर्न त्यजेद्गयाश्राद्धं सिंहस्थे च वृहस्पतावि
तिषाये पीये गयायां सर्वकालेषु पिंडं दद्याद्धि च क्षणइति च। संक्रान्त्यादौ ग्रहरोगेप्रशस्तं कृष्णापक्षश्च प्रशस्तः मकरः प्र
शस्ततरः। अस्थिक्षेपं गयाश्राद्धं चापरपक्षिकं अब्दमध्ये न कुर्वीत सपिंडीकरणं विनेति गारुडे। प्रथमेऽब्दे न कुर्वीत कृतेपि राम २८

तु सपिंडनेऽन्ये उत्तरार्धे पठंति। तदपवादं च अस्थिक्षेपमिमादि पूर्ववत्। प्रथमेऽब्दे पि कुर्वीत यदि स्यात्क्रमागतइति परं
ति। अब्दमध्ये पि गयाश्राद्धे देवतावसिद्धये देवतासंस्कारकं तद्देवत्यमेव पार्वणं भवति। ...श्राद्धं कृत्वा स एव मध्याह्ने श्राद्ध
वान् गयाश्राद्धादि कुर्वीतेत्यर्थः कश्चित् प्रयाश्रुतमर्थं मन्ये। पतितानामपि गयायां पिंडदानं वर्षान्तरं कार्यं। महालये गया
श्राद्धे मातापित्रोर्मृतेहनि। कृतोद्वाहो पि कुर्वीत पिंडनिर्वपणं सुतइति संग्रहे। उद्वाहोद्वहश्राद्धनिमित्तोपलक्षणं। उप
रागे अतीपाते गयायामथ पर्वणि पितृपक्षे च यत्नेच गंगायां च महालये निषिद्धेपि दिने कुर्यात्तिलयुक्तं तु तर्पणमिति।
अत्र पितृपार्वणमातृपार्वणमातामहपार्वणमातामहीपार्वणानि कार्याणि। पितृव्यादिभ्यो पि दद्यात् तत्पत्नीभ्योपि भ
तृपिंडात्स्य एव पिंडाः। संबंधं विना पत्र समर्पमारोप्यः पिंडादानं पत्न्याम्नापातयेत्। पिंडं तेन पेद्धूस्थशाश्वतमि
त्युक्तेः। षडदैवत्यमेवावश्यकमिति अन्ये अस्मत्पक्षे मातामहानां सपत्नीकानामित्युक्तेरेवइति स्मृत्यर्थसारे मात्रास
ह न वसेद्दैवत्यमिति पितृअन्नात्मनो पत्र तिलकुशहीनं पिंडदानं जानाईनदश्चे एव कार्यं। अन्यस्यापि जीवतरावेम

वपिंडदानं कार्यमिति समर्थवायपवीये । इदं जीवतः पिंडदानं अपुत्रादेरेवेति केचित् तत्तत्र न मूलं । गयायां निर्गुणा अपि तत्रत्या विप्रा
२९ एव भोजनीया इति हेमाद्रिः । अक्षय्यवटश्राद्धे एव तेषां भोजनमाचारादित्यन्ये । गयाप्रवेशादिने फल्गुवां छन्नस्नानतर्पणश्राद्धादि
कृत्वा तद्दिने प्रेतशिलायां सक्तुतनचरुणा श्राद्धेन प्रेतत्वविमोके श्राद्धान्तरेषु स्वयत्वयोग्यता भवति । तत्रैव रामतीर्थे स्नानं पिंड
दि प्रेतत्वविमोचकं । यमराजधर्मराजयोः श्यामशबलयोश्चात्र पिंडदानं । तत्रैव प्रभासे शाग्रेयाभ्यो बलिर्देयः । गया
मानिनिमित्तको मुंडोपवासो नेत्युक्तं । द्वितीयदिने प्रेतपर्वते श्राद्धं ततस्तत्रत्यब्रह्मकुंडे श्राद्धं कार्यं । इदं सर्वं गयाश्राद्ध
प्रकृतिभूतं । तृतीयदिने पंचतीर्थी तत्रादावुत्तरमानसाख्ये सूर्यकुंडे स्नानश्राद्धादि । ततो दक्षिणमानसे ततः । तत्रैव मध्ये
कनखलाख्यं तीर्थं उत्तरे उदीचीतीर्थं च । ततः फल्गुतीर्थे स्नानादि तत्रैव पितामहं नमः शिवायेति नत्वा गदाधरं पश्येत् । चतुर्था
दिने धर्मारण्यं गत्वा मतंगवाप्यां स्नानादि । तत्र मतंगेशं नतिः । तत्रैव ब्रह्मतीर्थकूपे श्राद्धादि तत्कूपयूपयोर्मध्ये च धर्मं धर्मेश्व
रौ नत्वा महाबोधितरुं नमेत् । पंचमे ब्रह्मसरसि स्नानश्राद्धादि । तत्रैव गोप्रचारसमीपस्थाम्रमूले पितृतर्पणं । तत्रैव ब्रह्मयूपप्रद राम
२९

क्षिणं ब्रह्मनमस्कारो यमबलिः श्वबलिः काकबलिश्च ततः स्नानं । ततः षष्ठेहनि स्नानविधिना फल्गुस्नानं । ततो गयाशिरस्य
पदेषु स्नानं । पदानि च विष्णुरुद्रब्रह्मकाश्यपपंचाग्नींद्रागस्त्यरविचंद्रगणेशेंद्रकार्तिकेयक्रौंचानां । एषु पदेषु मध्य
मे सक्तुपिंडाः ; द्वितीये तिलगुडमिश्रं तृतीये पायसस्य चाथ चतुर्थे दुग्धतर्पणं । पंचमे दोषपदानमिति पंचदिनकृत्यं । अनवकाशे
त्रिषु द्वयोरेकस्मिन्नपि कार्यं । तदग्रिमदिने गयालोले स्नानश्राद्धादि । ततोऽक्षयवटेऽत्रैव श्राद्धं । अत्र ब्रह्मकल्पितग
यास्थब्राह्मणानेव पित्रादिस्थाने भोजयेत् । येषु ब्राह्मणेषु तृप्तेषु गयायामागता नराः । हव्यैः कव्यैर्धनैः श्राद्धैस्तेषां कुलशतं
व्रजेत् इत्याग्नेयात् । तत्रैव देशवटनमस्कारो । अन्यान्यपि तत्रत्यतीर्थानि तत्र गायत्रीतीर्थे सावित्रीतीर्थे सरस्वतीतीर्थे पुंसंध्यात्र
यानुस्नानं । विशालालेलिहानभरताश्रमपादांकितमुंडपृष्ठ आकाशगंगागिरिकर्णामुखवैतरणीगोप्रचारघृतकुल्यामधुकु
ल्या अमरककोटितीर्थरुक्मकुंडपांडुशिलाचंपकवनदेविकामहानदीदशाश्वमेधहंसतीर्थमातंगपदमध्यकुंडगयां
कूपमांजेउपादकूपादेभस्मकूपधौतपादरामपुष्करिणीसुषुम्नामहाकालीवसिष्ठेशरतीर्थे कामधेनुपदांकितधेनुकारराय

Indira Gandhi National
Centre for the Arts

३०

कर्द्दमालपगपानाभिफलाचं उंडीरमशानसंगयागजगयादित्यपुंडरीकास्रमरताश्रमस्यरामपदकुंड पर्वतोयंतकाद्रिरुद्धरंतकुं
डवेकुंटलोहदंडहेमकूटगृध्रवटगृध्रगुहाक्रणमोक्ष पापमोक्षशिलोदरगजगणेशसंउद्धारविशालद्विश्वरविदवनकौ
चपादादीनि ॥ ॥ इतिगयाप्रकरणम् ॥ इति श्रीशिवभट्टसुतसतीगर्भजनागोजीभट्टकृतस्तीर्थेंदुशेखरः समाप्तः ॥
॥ ग्रंथसंख्या ॥ ८०० ॥ मीतिचइत्र शुद्धत्रीतिया ॥ ३ ॥ वारबुधवार ॥ संवत् १८५१ ॥ श्रीरामायनमः श्रीकृं०

राम
३०

Indira Gandhi National Centre for the Arts